सुसंहतभारतम्

लेखकः

पुल्लेलः श्रीरामचन्द्रुडुः

शिरोमणि–विद्वान्–विशारद–एम० ए० (संस्कृत-हिन्दी-इंगलिश)
व्याख्याता, आर्ट्स एण्ड साइंस कालेज, वारंगल (आन्ध्रप्रदेश)

प्रकाशिका

संस्कृत-परिषद्

विश्वविद्यालयः, सागर

सुसंहतभारतम्

लेखकः

पुल्लेलः श्रीरामचन्द्रुडुः

शिरोमणि-विद्वान्-विशारद-एम० ए० (संस्कृत-हिन्दी-इंगलिश)

व्याख्याता, आर्ट्स एण्ड साइंस कालेज, वारंगल (आन्ध्रप्रदेश)

प्रकाशिका

संस्कृत-परिषद्

विश्वविद्यालयः, सागर

प्रकाशक
संस्कृत-परिषद्
विश्वविद्यालयः, सागर ।

मुद्रक
अमलकुमार बसु,
इंडियन प्रेस (प्राइवेट) लिमिटेड,
वाराणसी-शाखा ।



श्रीगोपालरेड्डिः

श्रीः

॥ कृतिसमर्पणम् ॥

श्रीमान् यश्चरितैर्नुतैस्सुविदितैः पूतामकार्षीद्भुवं
यश्चापूपुषदात्मबोधलतिकां गीतामृतासेचनैः ।
यः प्राचीकटदात्मनश्च सततं धर्मैकपक्षस्थतां
गोपालोऽवतु काम्यकर्मफलदो गोपालरेड्डिं प्रभुः ॥

अपूर्वसौजन्यविशेषमान्यो गोपालरेड्डिर्जयतीड्यबुद्धिः ।
सुनिर्वहन् मन्त्रिपदं चिरं यो रेड्डिप्रभून् स्मारयति स्ववंश्यान् ॥

ये राज्यकार्यैकविधानदक्षा वाचा परं वाङ्मयसेवकास्ते ।
गोपालरेड्डो द्वयलब्धवर्णो मनीषिणां मान्यतमोऽसि धन्यः ॥

नेता यत्र जवाहरः स विदितो नेह्रुः स्वराज्योद्यमः
तत्प्राप्तिः परिरक्षणञ्च विषयो देशैक्यसिद्धिः फलम् ।
सेयं रम्यकृतिः सुसंहतमहासद्धारतं सादरं
गोपालार्य सपर्य्यतेऽद्य भवते मोदेन सम्भाव्यताम् ॥

कान्ते शान्तिनिकेतने बहुतिथं नीत्वा पुरानेहसं
दान्ताद्विश्वकवे रवेः सुललिता विद्याः समासाद्य यः ।
नैकात्युत्तमकाव्यनिर्मितिचणश्चासि स्वयं सत्कविः
को वा स्याद् वद भावुकस्त्वदपरो योग्यः कृतिस्वीकृतौ ॥

———

भारतदैवतो जवाहरलालः

पण्डितजवाहरलालनेहरूः । एकस्मिन्नेवास्मिन्नाम्नि भारतभूमेरतीतं भविष्यं च साकारत्वमगात् । स्वकीये पञ्चसप्ततिवर्षव्यापिन्यायुष्काले महाभागेनानेन यद् यत् कृतं तत्सर्वं समग्राया भारतभूमेर्महते कल्याणाय । राष्ट्रस्यास्य पराधीनदशात आरभ्य स्वतन्त्रदशां यावत् नियतं देशोन्नतिचिन्तने तदनुकूलकर्मसम्पादने च निरलसोऽयं निःसंशयं भारतमुक्तिसाधकानां मूर्धन्यतां गतः । वैदेशिकशासनेनाउकृत् कारागारे नियन्त्रितोऽसौ चतुर्दशवर्षाणि तत्र व्यतीतवान् किन्तु निपीडितस्याप्यस्य देशप्रेम नाक्षिणोत् प्रत्युत शिलाबन्धनाद् गत्युत्कर्षमन्निर्झर इव दृढतां विस्तृतिं चाभजत । पराधीना भारतभूरेतस्य निस्तन्द्रसेवया नायकत्वेन च स्वातन्त्र्यं प्राप्तवती, स्वतन्त्रा च पुनरस्यैव संरक्षकत्वेन अग्रेसरन्ती सप्तदशवर्षाणि बहूनामुत्कर्षाणां भाजनं जाता ।

समस्याशतकुण्ठितस्य भारतराष्ट्रस्य निर्बाधोन्नतिमार्गं स्थिरीकर्तुं नित्यमहोरात्रं यतमानोऽसौ आत्मानमपि नागणयत् । अनिशं भारतकल्याणचिन्तापरोऽयं मनस्वी मे-मासस्य सप्तविंशदिवसे बुधवासरे आप्राणत्यागं राष्ट्रकर्म कुर्वन् पाञ्चभौतिकं वपुर्विहाय लोकान्तरं गतः । नायकोत्तमस्य जवाहरलालस्य विच्छेदेन कृत्स्नं भारतवर्षं विलपति, समग्रं विश्वं च शोकाम्बुधिमग्नम् । क्रान्तदर्शिन उदात्तादर्शवतः स्वातन्त्र्यतपस्विनो जवाहरलालस्य तत्त्वतो मृत्युर्नैव सम्भाव्यते, भारतस्यात्मभूतोऽसौ अमरत्वमासाद्य भारतस्येतिहासे चिरजीवी सञ्जातः ।

गान्धिमहात्मनो योग्यतमः शिष्योऽयं मानवानां मुक्तिसाधनमेव जीवनस्य परमं लक्ष्यं मत्वा स्वमातृभूमिं वैदेशिकशासनपाशेभ्यो मोचयितुं आ स्वातन्त्र्यप्राप्ति संग्रामं कृत्वा गुरुणा सममेव समेषां भारतीयानां हृदयमन्दिरे शाश्वतं स्थानं लब्धवान् ।

नासीदस्य स्वराष्ट्रादन्यः कोऽप्युपास्यः । भारतवर्षं भारतीयाश्चास्य

दैवतम्। भारतो भारतीयाश्च कथमुत्कर्षमार्गं व्रजेयुरित्यासीत्तस्य प्रतिक्षणं ध्यानविषयः। भारतीयार्षपरम्परां ध्यायं ध्यायं सर्वत्रैव शान्तेः प्रसारार्थं यतमानोऽसौ जगत्यस्मिन् न्यायधर्मस्य प्रवक्तृत्वेन परां प्रतिष्ठां प्रापत्। भारतीयोऽप्ययं विश्वकल्याणभावनया सार्वभौमः सञ्जातः, वैदेशिकशासनेन निपीडितानां सर्वदेशगतानां मानवानां सबलो मार्गप्रदर्शकश्च। नासीदस्य भारतानुरागः संकुचितः। भारतस्य कल्याणं विश्वकल्याणेन सम्बद्धमिति मतिर्वस्तुतो लोकोत्तरत्वमस्य मनीषाया गमयति। हिंसया द्वेषेण च न कदापि कस्यचिदपि कल्याणं सञ्जातमित्यासीदस्य मानवेतिहासधुरन्धरस्य प्रत्ययः।

यस्मिन् युगे प्रायो मानवाः क्षुद्रहृदयः, स्वप्रदेशस्य स्वभाषायाः स्वजातिविशेषस्य च केवलं स्वार्थरक्षणपराः, तस्मिन् युगे समग्राया भारतभूमेः कल्याणकामी जवाहरलालः स्वदेशे प्रतिमानरहितः, जगति च संघर्षबहुले अद्वितीय आसीत्। भूतविद्योपचितसामर्थ्या महाशक्तिर्नैव मानवधर्मस्य समुच्छेदसाधने क्षमा, प्रत्युत सैव शक्तिर्मानवधर्मस्य संरक्षणे संवर्धने च नियोज्येति उदारः संकल्पोऽस्य महानुभावस्य।

अनन्तकं दारिद्र्यम्, पश्चात्पदता, शिक्षाया अभावः, परतन्त्रताहैतुकी नैतिकी अधोगतिः, भयंकर आत्मविभेदः—इत्येतासां समस्यानां समाधानाय या निष्ठा कर्मशक्तिश्चानेन प्रदर्शिते तयैव नायकोत्तमोऽयं सर्वेषां आबालं भारतीयानां हृदये विराजते। हृतेऽपि तच्छरीरे, मृत्युना तस्मात् स्थानात् तदपहरणं न कदापि साध्यम्।

तदीच्छेच्छानुसारं भारतस्य मृत्तिकया विमिश्रितं गंगया प्रवाहितं समुद्रेण तरङ्गितं तद्देहभस्म निरन्तरं भारतराष्ट्रं भारतीयांश्च मानवधर्मानुसरणे अभ्युदयवर्त्मनि च प्रेरयतु। भारतोऽपि देशः सर्वतोमुख्या समृद्ध्या आत्मौदार्येण च तर्पयतु आत्मानं जवाहरलालस्येति शम्।

यावद् भारतभूमिः स्यान्न्यायबुद्धिश्च मानवे।
तावत्स्थास्यति ते नाम हे जवाहर भूतले॥

——

सुसंहतभारतम्

पुल्लेल श्रीरामचन्द्रुडु

प्रथमोऽङ्कः

(नान्दी)

या वेदत्रयमातृमूर्तिरपरा या भूर्भुवस्स्वःपरा
तद्भर्गस्सवितुर्वरेण्यमतुलं देवस्य या शाश्वतम् ।
चिच्छक्तिश्च धियः प्रचोदयति नस्तां तत्त्ववर्णात्मिकां
गायत्रीं निजमन्त्रगायकपरित्रात्रीं सदा धीमहि ॥१॥

(नान्द्यन्ते)

सूत्रधारः—(प्रविश्य) अलमतिविस्तरेण । आज्ञप्तोऽस्मि सकलभुवनतलकौटुम्बिकैः सहृदयैरार्यमिश्रैः अपूर्ववस्तुसंविधानेन केनचिद्रूपकेणोपस्थातव्यमिति । (सवितर्कम्) कुतो वा विलम्बं करोति भावः ! शीघ्रमेव किलागमिष्यामीति भणितमनेन ।

[ततः प्रविशति नटः]

नटः—आर्य क्षन्तव्यो विलम्बः, नानाप्रान्तसमागतानामस्मदीयानां शैलूषाणां मध्ये स्वस्वप्रान्तीयवेषभाषोच्चारणादिकमधिकृत्य प्रसङ्गवशेन वाग्विवादः प्रवृत्तः ।

सूत्रधारः—हन्त भोः ! एकप्रयोजनप्रवृत्तानाम् अस्मदीयानामपि मध्ये विवादः । ततः किं संवृत्तम् ?

नटः—ततो मया—

यस्याः शीर्षमलङ्कृतं हिमगिरिप्राज्यकिरीटेन या
नित्यं दक्षिणसिन्धुराजसलिलैः प्रक्षाल्यपादाम्बुजा ।
यस्स्वास्थ्यं किल सूचयन्ति च सरिन्नाड्योऽच्छधारावहाः
सा तस्याश्चलवासिनी भरतभूर्माता हि नः का भिदा ॥२॥

इत्यादि बोधयता सर्वेऽपि ते समाहिता भवत आज्ञां प्रतीक्षन्ते ।

सूत्रधारः—(सहर्षम्) साधु भाव साधु । साफल्यमस्मद्यत्नस्य सूचयतीदमिति महान् मे प्रमोदः ।

नटः—अथ केन रूपकेणोपस्थातव्यमद्यास्माभिः ?

सूत्रधारः—अस्ति गोदावरीतीरलब्धतनुः पुल्लेलाभिजनः श्रीरामचन्द्रो नाम, तस्य चाभिनवा कृतिः 'सुसंहतभारतं' नाम रूपकम् । तदद्य प्रयोक्तव्यं पुरत आर्यमिश्राणाम् ।

नटः—अहो ! आन्ध्र-हिन्दी भाषामुखाः देशभाषाः, विविधखण्डप्राप्तप्रसरामाङ्गलभाषां वा अनादृत्य कथमिदं कतिपयजनमात्रज्ञेयं संस्कृतरूपकं प्रयोक्तुमुद्युज्यते भवता ?

सूत्रधारः—(सवैलक्ष्यस्मितम्) भाव ! अविचारितरमणीयं खलु ते वचनम् । आङ्गलभाषा किल आङ्गलानामेव भाषा । संस्कृतभाषासत्कारश्च आन्ध्रभाषादीनां भारतीयभाषाणामपि समादरः एव, मातुः सम्मान आत्मनः अवमान इति का वा अमूढा चिन्तयति ?

अपि च—

आसेतोराहिमाद्रेः प्रथितगुणगणैः पूजिता या सुधीभिः
श्रुत्वा शीर्षाण्यधून्वन् प्रसृतरसभरां यां मुदा ते विदेश्याः ।
आनन्दानां बहूनामिहपरजननेष्वद्भुतानां खनिर्या
तस्या गीर्वाणवाण्याः घृतनवजनुषा भाषया को विरोधः ॥३॥

नटः—आर्य न खलु वदामि संस्कृतभाषया साकमस्ति कोऽपि विरोधः देशीयभाषाणामिति । को वा न जानाति सर्वा एवैताः संस्कृतवाणीदत्तहस्तावलम्बा एवेति, परन्तु एतावदेवोच्यते मया यदेषा न सर्वजनसुज्ञेयेति ।

सूत्रधारः—(विहस्य) अचिन्तितमिदमुच्यते सर्वजनसुज्ञेयाभिर्भवितव्यं सर्वभाषाभिरिति । किं सर्वजनसुज्ञेयैव वा आङ्गलभाषा यैषा चिरमध्यारोपिता भारतीयानां शिरसि नाऽद्याप्यवतरणस्य वार्तामपि स्मरति । नापि वा दुर्ज्ञेया संस्कृतभाषा देशभाषाभिज्ञानां या किल ओतप्रोतरूपा सर्वासु भारतीयभाषासु ।

अपि च भिन्नभिन्नभाषावेशादीनां भारतीयानां एकतायाः प्रतीकं संस्कृतभाषा। इयं हि भाषा—

विभिन्नवेषांश्च विभिन्नभाषानानेकधाचारविचारभिन्नान्।
बध्नाति सर्वान् किल भारतीयानेकत्वसूत्रेण चिरं दृढेन ॥४॥

(नेपथ्ये)

किमात्थ रे! शैलूषापसद किमात्थ। "बध्नाति सर्वान् किलभारतीयानेकत्वसूत्रेण चिरं दृढेन" इति।

सूत्रधारः—अये भारतदेशैकमत्यश्रवणमात्रेणैवोपचीयमानक्रोध आङ्गलप्रधानामात्यः चर्चिल इत एवागच्छति। तदावामपसर्पावः।

[उभौ निष्क्रान्तौ; ततः प्रविशति चर्चिलः]

चर्चिलः—("किमात्थ रे" इत्यादि तदेव पुनः पठित्वा) को वा मयि जीवति एकतासूत्रेण शक्नोति भारतीयान् समाहर्तुम्! अहो महदिदमाश्चर्यं यद् भारतीया अपि वदन्ति 'ऐकमत्यम्, ऐकमत्यम्' इति। अथवा सन्तुष्यन्त्येते वाङ्मात्रेण, न खल्वेते शक्नुवन्ति एकस्मिन् स्थाने समीपतश्चरितुमपि; का कथा ऐकमत्यस्य! अपि च—

मोगलराज्यमहातरोरतिगुरोर्यासीत् कुठारः पुरा
याभूद्भारतदेशपालकमहाद्वेषाग्निसन्धुक्षणी।
फ्रान्सून् भारतपूर्वलब्धनिलयानन्यांश्च याऽद्रावयत्
साम्राज्याङ्गलमहामतिर्विजयते का भीतिरेभ्योऽपि नः। ५॥

(सवितर्कम्) भारतवार्ताः स्वयमेवास्माभिस्सह मन्त्रयितुमाहूतो नाद्याप्यायातो राजप्रतिनिधिः।

प्रतीहारकः—(प्रविश्य) विजयतां प्रधानामात्यः। आर्यस्य आन्तरङ्गिककार्यदर्शिनौ भारतस्य राजप्रतिनिधिश्च द्वारदेशमधितिष्ठन्ति।

चर्चिलः—प्रवेश्यन्तां सर्वे।

प्रतीहारकः—यथाज्ञापयति प्रधानसचिवः। (निष्क्रम्य पुनस्तैः सह प्रविश्य) अयं प्रधानामात्यः, उपसर्पन्तु भवन्तः।

सर्वे—विजयतां प्रधानामात्यः ।

चर्चिलः—(सस्मितम्) उपविशन्तु सर्वे । राजप्रतिनिधे यथाचिन्तितं समनुप्राप्तो भवान् । (सर्वे उपविशन्ति) अथ—

आंग्लेयाखण्डसाम्राज्यलक्ष्मीचूडालसन्मणि ।
अपि भारतराज्यं नो राजते निरुपद्रवम् ॥ ६ ॥[१]

द्वितीयः कार्यदर्शी—(साशङ्कम्, आत्मगतम्) हन्त किमिदमुच्यते 'नो राजते' इति ।

राजप्रतिनिधिः—का वा कथाप्युपद्रवस्य भवन्मतिविभवकृतरक्षासंविधाने राज्ये ? यतः भारते हि—

अन्त्याप्रजातिषु मिथो जनितो विरोधो
द्वेषो महांश्च मतहेतुरनेकरूपः ।
रक्षाप्रदानबहुमानमुखैरुपायै-
रावर्जिताश्च सकला अपि देशराजाः ॥ ७ ॥[२]

चर्चिलः—साधु राजप्रतिनिधे ! साधु (उच्चैर्विहस्य) अहो मूर्खता भारतीयानाम् ! अधिकारलेशदरिद्रासु शासनसभासु प्रवेशलाभार्थमप्येवमेते परस्परं कलहायन्ते । हन्त, नूनं दृढकृतरक्षासंविधानमिदमस्माकं भारतराज्यम् ।

---

1. "Nehru recalled that as far back as January 1930, Churchill had declared,—"Sooner or later you will have to crush Gandhi and the Indian Congress and all they stand for. "The British Prime Minister was a resolute opponent of Indian freedom. 'England, apart from her empire in India ceases for ever to exist as a great power' he had warned."

"Jawaharlal Nehru" By Frank Moraes. Page. 281.

2. "Not only was the British Government unwilling to part with power, but it appeared as if were resolved to encourage divison by using the dead weight of the minorities and Princes against the nationalists." "Jawaharlal Nehru' P. 28.

प्रथमः कार्यदर्शी—अत्र चास्मद्देशीयैरनुसृता, महामात्येन च दत्तहस्तावलम्बा राजनीतिरेव हेतुः, सैनिकोपप्लवादारभ्य, विशेषतश्च षष्टेर्वर्षाणां नैकधाऽस्माभिः कृतपुरस्कारा महम्मदीया न कदाप्यस्माकमाज्ञां व्यतिचरेयुरिति मे विश्वासः।

राजप्रतिनिधिः—सत्यमेवेदम्, किन्तु........

चर्चिलः—(सवितर्कम्) किन्तु ?

राजप्रतिनिधिः—मन्ये यथार्थाधिकारहीनात् शासनसभाप्रवेशमात्रात् नैव तृप्येयुर्भारतीयाः, न वा तदर्थं विरोधं कुर्युः परस्परमिति। अत एव प्रतिदिनोपचीयमानयशा जवाहरलालनेहरुः अन्ये च केचित् सुभाषचन्द्रवसुमुखाः, "सम्पूर्णराज्यमेवाऽस्माकं लक्ष्यमिति" वदन्ति।

चर्चिलः—स्वप्नमात्रोपलभ्योऽयमेषां दुराशोपहतात्मनामभिलाषः, शृण्वन्तु सर्वे—

या व्याप्ता सकलासु दिक्षु, निखिलैः खण्डैर्भुवः सङ्गता
नास्तं याति गभस्तिमाननवधौ यस्याश्च सीमान्तरे।
तस्या नैकशताब्दनीतिसुफलस्याङ्ग्लेयराज्यक्रियो
नाशं द्रष्टुमिह प्रधानसचिवो नाऽभूदयं चर्चिलः ॥८॥[1]

प्रथमः कार्यदर्शी—साधूक्तं प्रधानसचिवेन, शशशृङ्गं खल्वन्विष्यन्त्येते स्वराज्यलिप्सवो भारतीयाः।

द्वितीयः कार्यदर्शी—मा मैवम्। तादृशो महान् देशः नैव शक्यते वचोमात्रेण निराकर्तुम्। किञ्चिदवहितचित्तैरेवाऽस्माभिर्व्यवहर्तव्यमस्मिन् विषये।

चर्चिलः—(सवैलक्ष्यस्मितम्) किमुच्यते महान् देश इति।

निर्वीर्यैः क्षुधितैर्नैकभेदैः प्राणिभिराकुलम्।
भारतं चेन् महान् देशः कोऽपायो वल्मिकैः कृतः ॥९॥

---

1. "But the Empire, over whose liquidation he (Churchill) later refused to preside, was on the high road to dissolution."

"J. Nehru' P. 302.

द्वितीयः कार्यदर्शी—अप्रियमपि यथार्थं वचो मे क्षन्तुमर्हन्ति महामात्याः। मद्रासराष्ट्रराजपालेन मे आवुत्तेन कथितं गान्धि-नेहरु-आन्ध्रकेसरिमुखाः किल नेतारः नैकशताब्दीपारतन्त्र्यफलामन्तःकलहशीलतां परित्यज्य ऐकमत्येन स्वराज्ययुद्धसन्नद्धैर्भवितव्य'मिति उद्बोधयन्तः आसेतुहिमाचलं सर्वान् जनान् सुसंघटितान् कुर्वन्ति'' इति।

राजप्रतिनिधि.—अहमप्येतदेव वक्तुकामोऽस्मि। पूर्वस्याः शताब्द्याः अष्टापञ्चाशत्तमे वत्सरे विफलात्स्वातन्त्र्यसमरादारभ्य...........

प्रथमः कार्यदर्शी—(सावज्ञम्) किमिदम् ! कैश्चित् सैनिकंमन्यैः चिकीर्षितं पञ्चषाहप्रवृत्तमुपप्लवमपि स्वातन्त्र्यसमरं वर्णयति राजप्रतिनिधिः।

राजप्रतिनिधिः—अस्माभिरङ्गीक्रियतां मा वा; भारतीयाः पुनस्तमेव स्वातन्त्र्यसमरप्रारम्भं मन्वानाः तत आरभ्य वर्षशतात् पूर्वमेव स्वातन्त्र्यलाभफलं विजयमुत्प्रेक्षन्ते।

द्वितीयः कार्यदर्शी—एवमेवोक्तं ममाप्यावुत्तेन। अपि च अहेतू हि जयपराजयौ समरत्वासमरत्वनिर्णये। यतः—

जयोन्मुखा विजीयन्ते जयन्त्यपजयोन्मुखाः।
इत्थं मन्ये पराभूतिविजयौ शक्त्यहेतुकौ ॥१०॥

अत एव खलु पूर्वं किञ्चिदनादृताः महम्मदीयाः तदाप्रभृत्यस्माभिरात्मीयतापदं समारोप्यन्ते हैन्दवबलतिरस्काराय।

चर्चिलः—आस्तां तावदिदं सर्वम्। कथयतु राजप्रतिनिधिरात्मनो विवक्षितम्।

राजप्रतिनिधिः—अद्य भारते महान् विपरिणामो दृश्यते। सर्वदाप्येकान्तफला अस्माकं भेदोपायाः अद्य विफला इव लक्ष्यन्ते।

प्र० का० द०—कुतो वा एवं मन्यते भवता ?

राजप्रतिनिधिः—प्रथमत एव किल निवेदितं मया सत्याधिकारविहीनात् शासनसभाप्रवेशात् अन्तःकलहादृते न किमपि प्रयोजनमिति निश्चितमतयः सर्वे भारतीयाः स्वस्वभेदान् विस्मृत्य यथार्थं स्वपरिपालनाधिकारमेवाभिलषन्ति' इति।

प्र० का० द०—कां वा रीतिमनुसरन्ति महम्मदीयाः ?

राजप्रतिनिधिः—मन्ये तेषामप्यस्मिन् विषये न कापि विप्रतिपत्तिरिति। एतमेव च विषयमधिकृत्य मया सह मन्त्रयितुं गान्धिः द्वित्रिवारम् आयातः।

चर्चिलः—(सवैलक्ष्यस्मितम्) हन्त! महतीयं खल्वपरा विमानना अस्माकम्। यतः—

अर्धनग्नतनुर्दन्तहीनतुण्डश्च मुण्डितः[1]।
राजप्रतिनिधेः सौधं दण्डी भिक्षुर्विशत्यहो! ॥११॥

[सर्वे हसन्ति]

राजप्रतिनिधिः—गान्धिमोतीलालप्रभृतिभिर्मितवादिभिरङ्गीकृतं सामन्तीयस्वराज्यमनादृत्य जवाहरलालः तदनुसारिणश्च "सम्पूर्णस्वराज्यमेव लप्स्यामहे' इति किल वदन्ति।

प्र० का० द०—नूनं जवाहरलालविषये सानुक्रोशं मे मनः। यतः—

देशप्रसिद्धविभवस्य हि मोतिलाल-
स्यैकैकसूनुरिह चाप्तसमस्तविद्यः।
त्यक्त्वा श्रियं नृपकुमारसमृद्धितुल्यां
कारागृहेषु सुखमिच्छति लब्धुमन्यैः ॥१२॥

राजप्रतिनिधिः—सत्यमेतत्! अत एव चायं 'त्यागमूर्तिः', 'भारतभूषणम्' इत्यादिभिर्बिरुदैः संस्तूयते भारतीयैः।

प्र० का० द०—(विहस्य किं वा प्रयोजनमेतैः वृथाबिरुदैः? श्रूयते तत्रत्या बहवः स्वयं प्रदत्तबिरुदा इति।

---

1. "Addressing the West Essex Conservative Association on February 23, 1931, Winston Churchill declared "It is alarming and nausiating to see Mr. Gandhi, a seditions Middle Temple Lawyer, now posing as Fakir of a type well-known in the East, striding half-naked up the steps of the Vice-regal palace, while he is still organising and conducting a defiant campaign of civil disobedience, to parley on equal terms with the representative of the King-Emperor." 'J. Nehru 'Page 180

राजप्रतिनिधिः—ततोऽप्यधिकं केचित् किल सुभाषचन्द्रबसुप्रभृतयः युद्धेनैव स्वराज्यं लब्धुं समीहन्ते।

प्र० का० द०—(उच्चैर्विहस्य) मन्ये, लोष्टैः लगुडैश्च ते युद्धं करिष्यन्तीति।

चर्चिलः—(सावज्ञम्) श्लाघ्यः किल तेषां धैर्यविशेषः य एते मनसापि वा चिन्तयन्ति संग्रामम्।

राजप्रतिनिधिः—तदर्थं ते भारतसीमान्तपर्यन्तमागतान् जापानदेशीयाना-श्रयितुमिच्छन्तीत्यपि ज्ञातं मया चारवचनात्।

द्वि० का० द०—तानपृष्ट्वैव 'भारतीया अपि जापानदेशीयैर्योत्स्यन्ति' इति खलूद्घोषितमस्माभि। अतोऽपि च ते अस्मास्वप्रसन्ना इति शृणुमः। अपि सत्यमिदम्?

राजप्रतिनिधिः—अथ किम्। अत एव मे संदेहः, किमन्येऽपि बसु-प्रभृतीननुसरिष्यन्ति इति।

प्रथमःकार्यदर्शी—न किमपि शोचनीयमत्र, जापानदेशीया न कदापि सहायसन्धिमङ्गीकरिष्यन्ति। यतः,

सन्धिः समबलै राज्यैरुपकारकृते मिथः।
निर्वीर्यैस्सह सन्धिस्तु रक्षाभाराय केवलम्॥१३॥

द्वि० का० द०—मा मैवम्। अनुकूलासु प्रजासु सुसंग्राह्याणि किल भवन्ति राज्यानि। अतो जापानदेशीयाः सहर्षमङ्गीकरिष्यन्त्येवैतत्, किन्तु ममाऽयं विश्वासः सम्पूर्णस्थिरस्वातन्त्र्याभिलाषुका इमे जवाहरलालप्रभृतयः एकं त्यक्तुं नाऽन्यत् पारतन्त्र्यं क्रीणीयुरिति।

राजप्रतिनिधिः- एवं स्थिते का वा पालनारीतिरनुसर्तव्या भारते इति आज्ञप्तुमर्हति प्रधानामात्यः।

प्र० का० द०—किमन्यत्! 'वन्दे मातरम्' इत्यपि ये वदन्ति ते सर्वेऽपि महता काठिन्येन दण्डनीयाः। बहोः कालात् विस्मृतखड्गनामान एते द्वित्रिवारं

गोलायुधशब्दश्रवणेन श्रुतसिंहगर्जिता इव हरिणाः पलायिष्यन्ते, का कथा प्रत्यवष्टम्भस्य ?

चर्चिलः—भवतु; अस्त्येव खल्वयमन्तिम उपायः। अस्मिन् समये किञ्चिदवहितचित्तैरेव प्रवर्तितव्यमस्माभिः कार्येषु।

द्वि० का० द०—एकतः संप्रवृत्तसङ्गरैरस्माभिर्यावदुपपद्यते भारतीयैर्विरोधः परिहर्तव्यः, तेषामाशाः ज्ञातुं कस्यचित् सङ्घस्य तत्र प्रेषणं युक्तमिति मे मतिः।

चर्चिलः—ममापि हृदयेन चिन्तितं भवता यदर्थञ्च क्रिप्सुं प्रेषयिष्यामः। अनेन चातीव नैपुण्येन प्रवर्तितव्यमस्मिन् कार्ये।

दास्याम इति वक्तव्यं कर्तव्यो नियमो महान्।
अपूरिते च नियमे दोषस्तेष्वेव धीयताम्॥१४॥

राजप्रतिनिधिः—कीदृशो वा नियमो विधातव्यः ?

चर्चिलः—स्वराज्यं तदैव दीयेत यदा सर्वेषां भारतीयानामन्त ऐकमत्यं भवेदिति। गूढमस्माभिरुत्कोपिता महम्मदीयाः न कदापि हैन्दवानामाशयमङ्गीकरिष्यन्ति। तत्कृते च महम्मदीयानुपायान्तरैस्तोषयिष्यामः। एवं कृते न केवलमद्य, शतवर्षसमनन्तरमपि वा भारतस्वराज्यं आकाशकुसुमसङ्काशमेव भवेत्। अपि च...

राजप्रतिनिधिः—अवहितोऽस्मि, आदिशतु महामात्यः।

चर्चिलः—शतषट्कसंख्याश्च सर्वे राजानः काले काले दानमानादिभिस्तथा आत्मसात्कर्तव्याः यथा पारतन्त्र्यमेव राज्यनिर्वहणादिभाररहितं स्वराज्यं मन्येरन्।

राजप्रतिनिधिः—(सस्मितम्) भारताक्रमणसमये समुपलब्धसाफल्योऽयं मार्गः चिरप्रहत एवास्मद्देशीयानाम्। अहं बहोः कालादेनमनुसरामि। विशेषतश्च अजीज-रंगोजीनामानौ राजानौ अन्यैरपि नैकसङ्ख्यै राजभिरङ्गीकृताज्ञौ तथा सम्मानादिभिराद्रियेते मया यथा स्वगृहानपि विस्मृत्य प्रायः अस्माकमेव सविधे निवसतः यथा च अस्मदीयानामपि तयोरादरे किञ्चिदसूयेव जायते।

तयोश्च साहाय्येन प्रायः सर्वेऽपि हैन्दवा महम्मदीयाश्च राजानः स्वायत्तीकरिष्यन्ते ।

चर्चिलः—साधु राजप्रतिनिधे ! साधु । द्रक्ष्याम एवंकृते कथं वा एतेषां हताशानामाशाः फलिष्यन्तीति । गम्यतां शीघ्रमेव भवता यथानुसृतोपायनिर्वहणाय । वयमपि अनन्तरकरणीयाय क्रिप्सुना मन्त्रयिष्यामः ।

राजप्रतिनिधिः—तथा । [निष्क्रान्तः चर्चिलः राजप्रतिनिधिश्च]

प्रथमकार्यदर्शी—

युद्धयन्ति किल ते सर्वे तत्राहिंसा च साधनम् ।
उन्मादस्य चिकित्सैषां कारागारे विधीयताम् ।।१५।।

[इति निष्क्रान्तः]

द्वितीयः कार्यदर्शी—हन्त, वदन्त्वेते यथेष्टम्, अहं पुनर्मन्ये—

गान्धिना दीपितो वह्निः नेहरुणोद्दीपितो जवात् ।
शीतलोऽयमविज्ञातं दहेदेवाङ्गलवैभवम् ।।१६।।

अथवा किमत्र विचारितेन ? यतः—

सह्येत नाऽऽङ्ग्लैः किल पारतन्त्र्यं
मन्येत देशैरितरैस्तथैव ।
इत्यात्मसाधर्म्यधिया विचारे
कोऽस्माकमस्तीह विषादहेतुः ? ।।१७।।

[इति निष्क्रान्तः, सर्वे निष्क्रान्ताः]

इति प्रथमोऽङ्कः

———

द्वितीयोऽङ्कः

(ततः प्रविशतः संलपन्तौ नेहरुः वसुश्च)

सुभाषचन्द्रवसुः—स्वातन्त्र्यसङ्ग्राम अहिंसा इति च अन्योन्यविप्रतिषिद्धोऽयं प्रलापः ।

नेहरुः—मैवम् । देशकालानुरोधेन हि भिद्यन्ते साधनानि । अस्मिंश्च समयेऽस्मद्देशीयानामहिंसैवोत्तमं साधनमिति निश्चितं महात्मना । न हि महात्मनश्चिन्तितमन्यथा भवितुमर्हतीति अस्माभिरप्ययमेवानुसर्तव्यः पन्थाः ।

वसुः—हन्त भो ! भवतापि वा मम मतमङ्गीकरिष्यत इति सुमहत्याशा आसीत् , सर्वेयं विफला सञ्जाता ।

नेहरुः—साध्यविषये पुनर्न कस्यापि विप्रतिपत्तिः । परन्तु अद्य महात्मनोपदिष्टा अहिंसैव परमं साधनमिति न केवलं मम, कांग्रेसपक्षीयाणां सर्वेषामपि निश्चयः ।

वसुः—यत्किञ्चित् प्रलपन्त्येते वृद्धास्तपस्विन इव अहिंसा अहिंसेति । इदमेव मे विषादस्थानं यद् भवानप्येतदङ्गीकरोति । चिरात्प्रवृत्तोऽयमहिंसोपदेश एव अस्मान् भारतीयान् निर्वीर्यान् रणभीरूंश्चाकरोत् । काले काले युद्धं विना देशस्य स्वास्थ्यमेव न स्यादिति मे निश्चयः । वदन्ति हि राजनीतिज्ञाः—

सङ्ग्रामजोष्णता देशे नूनं व्यायामजानिभा ।
अन्तःकलहजा सा तु ज्वरोष्णत्वसमा मता ॥१॥

नेहरुः—सर्वथा सत्यमिदं वचनम्, परन्तु अन्तःकलहो ज्वरतुल्य इति भवतैव किलाद्य भणितम् ? अखण्डभारतस्वातन्त्र्यार्थं मेवैतावत्पर्यन्तमस्माकं सहयुध्वानः केचिदद्यत्वे देशं द्विधा खण्डयितुं यत्नं कुर्वन्तो महता श्रमेण सम्पादितां भारतीयानामेकतां नाशयितुमिवोद्युक्ताः श्रूयन्ते । एवंस्थिते प्रथमत

एव दुर्बलैरस्माभिरन्तर्युद्धबाह्ययुद्धयोः कथं वा विजेतुं शक्येतेति भवानेव तावत् चिन्तयतु ।

वसुः—(किञ्चिद्विचिन्त्य) सत्यमेवेदम्, परन्तु अत्राप्युत्प्रेक्षे कञ्चिन्निर्गमोपायम् । 'आङ्ग्लेयभेदोपायविकलीकृतमानसैर्नैवास्माभिर्मिथो द्वेषः कर्तव्यः' इति उपदेशेन भारतीयाः पुनः सुसंघटिताः कर्तुं शक्यन्ते । पूर्वमेवास्मद्देशसीमान्तं प्राप्तैर्महाबलैर्जापानदेशीयैश्च सन्धिं कृत्वा सुजय्याः भविष्यन्त्याङ्ग्लेयाः ।

नेहरुः—(सस्मितम्) श्लाघनीयेयं भवतः स्वराज्यतृष्णा । परन्तु भवदुक्तमुपायद्वयमप्यनैकान्तिकफलमेवेति मे मतिः । यतः

अयोदृषद्दारुमुखं हि सर्वं भग्नं पुनस्सन्धिविधौ हि शक्यम् ।
मनस्तु भग्नं न हि शक्यसन्धि विशेषतो भग्नमरातिभेदैः ॥२॥

यदप्युक्तं जापानसाहाय्येन सुजय्या आङ्गलेया इति तदपि मनोरथमात्रम् । अपि च—

जेष्यन्ति चेज्जपानीयाः तद्दासाः स्युर्हि भारताः ।
यद्यांग्लेयजयोऽस्माकं जीवनं संशयास्पदम् ॥३॥

किञ्च—

आंग्लेया वा जपानीया विदेश्या एव तेऽखिलाः ।
पारतन्त्र्यस्य तुल्यत्वे किं कृतोऽयं वृथा श्रमः ॥४॥

अस्मिन् समये आङ्गलपक्षानुसरणमेव मे रोचते । यदि ते विजेष्यन्ते तदा साहाय्यकरणसन्तुष्टाः मैत्रीभावेन कदाचित् स्वातन्त्र्यं यच्छेयुः ।

वसुः—इदमेव न रोचते, ते स्वातन्त्र्यदातारः वयञ्च प्रतिग्रहीतार इति । अदेशकालमिति वदन् भवानपि तानेव जरठाननुसरति । मया समानदर्शी सखेति भवते निवेदयितुं मे मतमागतोऽस्मि । भवतु, मम किल निग्रहार्थं आज्ञप्ता राजभटा मामन्विष्यन्तीति श्रुतम् । त्यक्त्वापि मित्रबान्धवादीन् विदेशान् गमिष्यामि स्वाभीप्सितसम्पादनाय ।

तावदेव हि मित्राणि तावदेव च बान्धवाः ।
देशक्षेमे तु कर्तव्ये न मैत्री न च बन्धुता ॥५॥

साधयामस्तावत् ।

नेहरुः—साधारणोऽयमस्माकं नियमः । भिन्नेष्वपि साधनेषु साध्यं किलास्माकं सर्वेषां सममेव । तत्सिद्ध्यै च यथामति प्रवर्ततां भवान् भवदभीष्टया विधया ।

[वसुः निष्क्रान्तः, नेहरुः चिन्ताकुलितमना उपविशति]

(नेपथ्ये कलकलः)

नेहरुः—कः कोऽत्र भो ! अवगम्यतां किंकृतोऽयं कलकल इति ।

प्रतीहारकः—(प्रविश्य) महाभाग ! महदाश्चर्यं संवृत्तम् । निर्गतमात्र एवाऽस्माकं गेहाद् वसौ निग्रहार्थं राजभटास्तं पर्यवारयन् ।

नेहरुः—किञ्च ?

प्रतीहारकः—पश्यतामेव तेषां भटानां निमेषमात्रादिव कश्चिद्रथिकः तं हस्तग्राहं गृहीत्वा यानमारोप्य विमानस्थानमनयत् । तत्र च सज्जं विमानमधिरुह्य झटिति पलायितोऽसौ केनाप्यविदितं स्थानम् ।

नेहरुः—नूनमपूर्वसाहसनिधानमयं महाभागः । भवतु, स्वं नियोगमशून्यं कुरु ।

प्रतीहारकः—तथा । (इति निर्गत्य पुनः प्रविश्य) महाभाग ! तत्रभवान् महात्मा गान्धिः वल्लभभाईपटेलश्च इत एवागच्छन्तौ दृष्टौ ।

नेहरुः—अहमपि तद्दर्शनार्थमेव जिगमिषामि । बह्वस्ति मन्त्रणीयमेताभ्याम् ।

[ततः प्रविशति गान्धिः पटेलश्च]

नेहरुः—(अभ्युत्थाय) महात्मन् वन्दे ! आर्य नमो भवते ।

उभौ—(प्रत्यभिवादनानन्तरमुपविशन्तौ) उपविश्यतां भवतापि ।

नेहरुः—तथा (इत्युपविशति)

गान्धिः—किमिदं किञ्चिदुद्विग्नमना इव दृश्यते भवान् ।

नेहरुः—अथ किम्, अपि श्रुतो भवद्भ्यां वसुवृत्तान्तः ?

उभौ—किं श्रवणेन ? प्रत्यक्षतः किल दृष्टोऽयमत्रागच्छद्भ्याम् ।

नेहरुः—भवदुपज्ञामहिंसारीतिमधिकृत्य आवयोर्वाग्विवादः प्रवृत्तः। भवत आशयः समर्थितो मया, परन्तु भवदुपदेशानां साफल्यविषये अनेके विषया बाधन्ते ममापि मानसम्।

गान्धिः—(सस्मितम) स्वाशयं स्पष्टमाविष्करोतु भवान्।

नेहरुः—प्रतिक्षणं सर्वेषु देशेषु महान् विपरिणामो विज्ञानाभिवृद्धिश्च दृश्येते।

गान्धिः—बाढम्, कोऽत्र संदेहः।

नेहरुः—एवं स्थिते मतसिद्धान्तवद् अहिंसासत्यादयो बोध्यन्ते भवता। अल्पानां तन्तुवयनादिपरिश्रमाणामेव प्राधान्यं दातव्यमितिच पुनः पुनः कथ्यते। एवं च—

प्रकृतिज्ञानसम्पद्भिरन्ये धावन्ति वेगतः।
वयं चङ्क्रम्यमाणास्तु कथं वानुसरेम तान् ॥६॥

गान्धिः—(सस्मितम्) किमयमेव भवतः संशयहेतुः ?

नेहरुः—अथ किम्, संक्षेपतः कथ्यमाने राजकीयविषयाणामाध्यात्मिकरूपदानं नैव युक्तमिति मे प्रतिभाति।

गान्धिः—(सस्मितम्) मन्ये, मतसिद्धान्तरूपेण अहिंसादीनामनुसरण एव दोषं पश्यति भवान्।

नेहरुः—अथ किम्।

पटेलः—तथात्वाङ्गीकारे हि सर्वदापि ते नियमा अनुसर्तव्या भवेयुः।

गान्धिः—केनोक्तं सर्वदा अनुसर्तव्या इति। कदाचिद् बहुजनहितार्थमवलम्बिता हिंसैव धर्मः। अत एव किल 'आततायिनमायान्तं हन्यादेवाविचारयन्' इत्यादि वदन्ति स्मृतिकाराः। देशकालप्रसङ्गानुसारेण च एषां पालनं नियमानामिति बहुधा कथितमेव खलु मया।

नेहरुः—आस्तां तावदिदम्। किञ्चिदिव प्रष्टुकामोऽस्मि तत्रभवन्तं यदि नान्यथा सम्भाव्येत मे पर्यनुयोगः।

गान्धिः—(सस्मितम्) पृच्छयतां विस्रम्भेण । अनियन्त्रणानुयोगः सपत्न-जनो नाम । अपि च कतिधा वा मया नोद्घोषितम् ।

सन्त्वत्र बहवः शक्ताः सुहृदो बान्धवास्समे ।[1]
राजनीत्युत्तरस्वामी नेहरुः स्यादेक एव मे ॥७॥ इति ।

नेहरुः—अनुगृहीतोऽस्मि । श्रूयतां मे संदेहः । लौकिकं किल दोषमपाकर्तुं लौकिक एव साधारण उपायोऽन्वेष्टव्यः ?

गान्धिः—(सशिरःकम्पम्) कोऽत्र संदेहः ।

नेहरुः—एवं स्थिते अत्यल्पानामुपायान्तरसाध्यानां कार्याणामपि किञ्चिदाध्यात्मिकं रूपं दीयते भवतेति हेतुमत्र ज्ञातुमिच्छामि ।

गान्धिः—उदाहरणमत्र श्रोतुमभिलषामि ।

पटेलः—सर्वेषामस्माकं साधारणोऽयं संदेहः । हरिजननियोजकवर्गविभागादिसमये, आत्मपावनार्थमिति च काले काले भवता कृता निरशनदीक्षाः अन्यानि च रामराज्यकामनादीनि मनसि कृत्वा अयं वदतीति मन्ये ।

नेहरुः—एवमिदम् ।

---

1. Six years earlier, at a meeting of the All India Congress Committee, at Wardha, Gandhi had publicly designated Nehru as his political heir........... The Mahatma said, "Somebody has suggested that Jawaharlal and I are estranged. It will require much more than differences of opinion to estrange us. We have had differences from the moment we became co-workers, and yet, I have said for some years, and say now that, not Rajaji but Jawaharlal will be my successor. He says that he does not understand my language, and he speaks a language foreign to me. This may or may not be true. But language is no bar to a union of hearts. And I know this that when I am gone, he will speak my language."

"Jawaharlal Nehru" P. 354

गान्धिः—(विहस्य) प्रत्यक्षत एव किलैषामुपायानां सफलता दृष्टा, लब्धे च साफल्ये कोऽयं योग्यताऽयोग्यताविचारः ?

नेहरुः—ननु वदामि, दृष्टेऽपि यादृच्छिके साफल्ये नैवैतेषां नियतसाधनता अङ्गीकर्तुं शक्यते ।

गान्धिः—(सवितर्कम्) किमुक्तं नैवैतेषां नियतसाधनतेति । हन्त भोः स्वानुभूत्येकमाना आध्यात्मिकी शक्तिर्नाम । कथं वा अहमेनां वाचा निरूपयेयम् ?

या गूढा भुवनत्रये प्रतिकणञ्चाभूधरादाप्यणोः
सर्वा भौतिकशक्तयश्च विदिता यस्याः किलाल्पांशकाः ।
तामाध्यात्मिकशक्तिमद्भुततरामज्ञेयरूपां परां
शक्ताः स्युर्बहुदूरतोऽपि गदितुं वाचः पराञ्च्यः कथम् ॥८॥

अपि च—

नानाशताब्दीदारिद्र्यदास्यदुःखादिभागिनाम् ।
इयमाध्यात्मिकी शक्तिरद्याप्युन्नतिकारणम् ॥९॥

अचिरादेव ज्ञास्यते इयं शक्तिः भवद्भ्यामपि । मानसिकी शक्तिः, विश्वासशक्तिः, इत्यादिभिर्नामभिर्वर्ण्यमानापि शक्तिः किलाऽस्या एवाध्यात्मिकशक्तेरंशः, यस्याः साहाय्येन सुमहान्ति नैकानि कार्याणि क्रियन्ते करिष्यन्ते च भवद्भ्यामपि ।

पटेलः—अहो ! आध्यात्मिकलौकिकशक्त्योः समन्वये नैपुणी महात्मनः ।

गान्धिः—किञ्च ममायमपि निर्णयः यत् नैवान्यत् ज्ञानं राजनीत्यां तावदुपकरोति यादृगिदमाध्यात्मिकं ज्ञानम् । यतः—

आत्माऽसौ निखिलेऽपि भूतनिवहे तुल्योऽखिलान् प्राणिनः
पश्येदात्मवदेव नैव कुहचित् कुर्यात् कदाचिद्भिदाम् ।
इत्याध्यात्मिकवेदिसूक्तिषु भवेद्यद्यंशतोऽप्यादरः
विद्येताऽत्र विभिन्नमानवगणे द्वेषस्य लेशोऽपि किम् ? ॥१०॥

पटेल:—मम तु इयमेव भीति:, सर्वोऽपीत: परम् इदमनशनादिकं स्वलाभोपायतया ग्रहीष्यतीति ।

नेहरु:—तस्य साफल्याऽसाफल्ये कर्तुरात्मशुद्ध्यधीने इति उक्तप्रायमेवोत्तरं महात्मना ।

गान्धि:—किञ्च —

उत्तमोऽपि किलोपायो दुष्कार्यमपि साधयेत् ।
लोकोपकारसन्धात्री विद्युच्छक्तिरिवापदम् ॥११॥

एतादृशेष्वेव कार्येषु दुर्जभो मानवस्य मोह: ।

पटेल:—अयोध्याप्रान्ते कस्मिंश्चित् परिमिते देशे कृतराज्यस्य पर्यालोच्यमाने संदिग्धसत्ताकस्य रामस्य राज्यं स्वराज्यस्यादर्श इति महात्मनो वचनं देशकालादिविरोधीत्यपि अस्मदीया बहवो मन्यन्ते ।

गान्धि:—किमुक्तं संदिग्धसत्ताकस्येति ! यदि य: कोऽप्यनात्मज्ञ: पाश्चात्त्यो यत्किञ्चित् प्रलपति किं तावदेवास्माभिरप्यङ्गीकर्तव्यम् ? अहो पालनास्वातन्त्र्यलिप्सूनामस्माकं दृढीभवति भावपारतन्त्र्यम् !

नेहरु:—अस्तु नामेदम् । सुविशालस्यास्य भारतराज्यस्य अत्यल्पं रामराज्यं कथं वा आदर्शो भवति ?

गान्धि:—कथं वा ज्ञायते अत्यल्पं रामराज्यमिति । चतुरुदधिवेलावलयितां किल महीं शशास राघव इति वर्णितमादिकविना ।

पटेल:—अतिशयोक्तिरियं कवेरित्यभिप्रयन्ति चारित्रिका: ।

गान्धि:—(सवैलक्ष्यस्मितम्) युक्तैवेयं धारणा ऐतिहासिकानाम् ।

हेतो: कुतश्चित् सकलेऽपि लोके नष्टे च चिह्नेष्वपि मार्जितेषु ।
आगामिनोऽस्मानपि वर्णयिष्यन्त्यज्ञानिनो मूढजना: पुरेति ॥१२॥

अपि च यथा केचित् स्वदेशमात्रपक्षपातिन: परगुणानपि दोषतयैव पश्यन्त: ऐतिहासिकंमन्या: वाणिज्यमिषेण मित्रद्रोहेण च परदेशास्कन्दनं महाविजय इति, स्वातन्त्र्यसङ्ग्रामं तुच्छ: सैनिकोपप्लव इति अन्यांश्चैवं-

विधानयथार्थविषयान् वर्णयन्ति न तादृशः पक्षपातः आपादयितुं शक्यते आदिकवेः। अपि च इदमकारणं राज्यं परिमितं वा विस्तृतं वेति आदर्शतया ग्रहणे। सापेक्षवृत्ती किल संकोचवैशाल्ये नाम। पश्यतां भवन्तौ—

वङ्गान्ध्रमगधद्रष्टुः विशाला भारतावनिः।
सर्वलोककुटुम्बस्य खण्ड एव हि भारतम् ॥१३॥

उभौ—सत्यमुक्तं भवता। अत एव किल महात्मा गीयते।

गान्धिः—श्रीरामस्य राज्यपालनारीतिरेव मे आदर्शः। यतः—

धर्मार्थं निजहस्तलब्धमपि तद्राज्यं मुदा योऽत्यजत्
लोकार्थं स्वसुखेन सार्धमपि यो जायां वनं प्राहिणोत्।
आसेत्वग्रहिमाचलञ्च सकलैर्यन्नाम जंजप्यते
किं तस्माद्रघुपुङ्गवात् परतरोऽस्त्यादर्शभूतः पुमान् ॥१४॥

तस्य परिपालनारीतिः न केवलं सार्वभौमैरेव, प्रजाप्रतिनिधिभिरपि पालकैरनुसर्तुं शक्यते इति सैवाऽस्माकमादर्शः।

उभौ—निपुणतरं छिन्ना नः संशयाः।

पटेलः—(किञ्चिद्विचिन्त्य) कथोपकथाप्रसङ्गेन आगमनकारणमेव विस्मृतमस्माभिः।

नेहरुः—मन्ये, न किमप्यत्याहितमिति।

पटेलः—कुतो वा नात्याहितम्? परित इव प्रेक्षे अस्माकं कारागारप्रवेशम्।

नेहरुः—(सस्मितम् कृष्णावतारानन्तरमद्य भविता रामावतारः।

पटेलः—अर्थात्?

नेहरुः—प्रथमत. कृष्णादर्शः कारागारसम्बन्धः किलाऽनुभूयतेऽस्माभिः ततश्चानुसरिष्यते रामादर्शः। [सर्वे हसन्ति]

गान्धिः—क्रिप्सुदौत्यबहिष्कारात्प्रभृति किंकर्तव्यताविमूढो राजप्रतिनिधिः स्वप्रधानामात्यस्य किलाज्ञां प्रतीक्षते।

नेहरुः—(विहस्य) किं वाऽन्यत् कर्तुं शक्नोति वराकः? मन्ये—

समुच्चित्याखिला दोषा विधात्रा धनिनामहो ।[1]
स्थूलेऽस्य काये निक्षिप्ता मुसलाग्रधिया समम् ॥१५॥

(सर्वे हसन्ति) अद्यैव कस्माच्चिदपि श्रुतं मया आङ्गलेयाः किल वदन्ति 'भारतदेशं द्विधा विभज्य यदि महम्मदीयेभ्यः विभिन्नं राज्यं दातुमङ्गीक्रियते तदा स्वराज्यं दास्याम'इति । महम्मदीयानामपि एषैव किलेच्छा ।

गान्धिः—अहो नैपुण्यमेतेषां भेदोपायविधौ ।

पटेलः—मन्ये—

पुरा वङ्गविभागे हि महान् कोलाहलः कृतः ।
तत्प्रतीकारवाञ्छैषां हेतुरत्र विनिर्णये ॥१६॥

गान्धिः—तेषां पुनरयं विश्वासः यद् वङ्गदेशविभाजनेऽपि तथाकृत-कोलाहला भारतीयाः कथं वा देशविभागमङ्गीकरिष्यन्ति ।

नेहरुः—तदा सर्वैरेव भारतीयैः मिलितैः प्रतिघटितो वङ्गविभागयत्नः । अद्य पुनः महम्मदीया विभागमेवाभिलषन्तीति महदत्याहितम् । किं वा अत्र कर्तव्यमुत्पश्यति महात्मा ?

गान्धिः—अद्यैव सन्दिष्टं मया सर्वेषां महम्मदीयानाम्—

सुसंहतानां भ्रातॄणां विभागो नाम केवलम् ।
दौर्बल्यरूपसम्पत्तिसंचयः सर्वनाशकः ॥१७॥

अपि च—

आसीदकबरसार्वभौमसुकृतेर्या राजनीतेः फलम्
दृष्ट्वा यामखिलांग्लराज्यरमया भीत्या चकम्पे पुरा ।

---

1. "Nehru describes the Viceroy (Lord Linlithgow) faithfully if also cruelly, 'Heavy of body, and slow of mind, solid as a rock with almost a rock's lack of awareness, possessing the qualities and failures of an old fashioned British aristocrat, he sought with integrity and honesty of purpose to find a way out of the tangle. But his limitations were too many."

"J. Nehru" P. 281.

सेयं हिन्दुमहम्मदीयजनतासम्पादितासंहतिः
क्रूरांग्लेयकुतन्त्रजालपतिता हा शीर्यते रक्ष्यताम् ॥१८॥

पटेलः—साधूपदिष्टं महात्मना। मम पुनर्महती संशीतिः कियद् वा साफल्यमस्य स्यादनुनयस्येति। यतः—

पूर्वं मुस्लिमसङ्घनिर्मितिरभूत् सद्यस्ततो हैन्दवाः
सङ्घं चान्यमपूपुषन्निति मिथो द्वेषेऽन्वहं वर्धिते।
क्रोधावेशविशीर्यमाणमनसां चित्ते कथं वा भवेत्
चालन्यामिव वारिणः स्थिरतरा सद्भाषितानां स्थितिः ॥१८॥

गान्धिः—(सवितर्कम्) ममाप्येवं संशयः (सनिश्चयमिव) सर्वथाप्यसम्भावनीयमिदं यद्देशविभजनं नाम।

पटेलः—कोऽत्र संदेहः। एवमेव मन्यते सर्वऽस्मत्पक्षीयाः।

नेहरुः—एवमिदम्। किन्तु मित्रस्य पटेलस्य संशयः मामपि बाधते। देशविभागार्थं साग्रहं विवदमानानां महम्मदीयानां, तानेव समर्थयतामन्येषाञ्चास्माकमुपदेशः अन्धकारनर्तितमेव स्यादिति। स्वातन्त्र्यविषये नैव हिन्दूमहम्मदीयानामैकमत्यमित्यनेनैवापदेशेन दृष्टान्तरङ्गा आङ्गलेया अपि स्वराज्यं न दास्यन्ति। एवं स्थिते—

पटेलः—अपि च ?

नेहरुः—सर्वेषामुपायान्तराणां वैफल्ये —

रक्तप्रसाररहितावयवैकदेश—
च्छेदेन रक्ष्यमवशिष्टशरीरमेवम्।
अन्तर्विरोधपरिहारसुखस्वराज्य-
सिद्ध्यै वरं सपदि देशविभाग एव ॥२०॥

अपि च—

पूर्वं दायविभागतोऽल्पविप्रयैर्द्विष्यन्ति ये वा मिथः
ज्ञात्वैकत्वबलं क्रमेण सहजा. स्निह्यन्ति पश्चात्परम्।
इत्थं देशविभागदुष्फलममी दृष्ट्वाऽपिवाऽतःपरं
सौभ्रात्राञ्चितमानसा, सुखतरं जीवेयुरस्मज्जनाः ॥२१॥

गान्धिः—हन्त भो ! इयं देशविभागकथापि नितरामुद्वेजयति मे मानसम् ।

यस्मिन्नैकविभिन्नजातिनिवहो वेषाश्च भाषाः पृथक्
नानाचारविचाररीतिरखिला भिन्नो मतानां गणः ।
प्रापन्नैक्यमनेकसिन्धुसलिलान्यम्भोनिधाने यथा
देशः सोऽयमहो ! मताग्निनिकरैर्दन्दह्यते भज्यते ॥२२॥

नेहरुः—साधारणोऽयं खेदः सर्वेषामस्माकम् । परन्तु अपरिहरणीयेऽर्थे किं वा क्रियतामस्माभिः ।

गान्धिः—(किञ्चिद्विमृश्य) अधुनातनमिदमनैकमत्यमेव मामेवं मुखरयति, न पुनर्विप्रतिपत्तिः भवद्वचने ।

नेहरुः—युक्तरूपमिदं महात्मनः । यतः—

विरुद्धे स्वाशयस्यापि बहुसंक्षेमलिप्सया ।
मते यस्तिष्ठतेऽन्येषां स एव खलु नायकः ॥२३॥

गान्धिः—युक्तमुक्तं भवता । नैव शक्नुयादसौ लोके सुखं जीवितुं क्षणमपि यो हि परेषां विमर्शं न सहते । अपि च—

अस्माकमेव बहुधा स्वविनिश्चितेऽर्थे
कालान्तरे भवति विप्रतिपत्तिरन्या ।
अन्यो यदि प्रकटयेद् विपरीतभावं
क्रुध्येम तत्र महती खलु मूर्खतैषा ॥२४॥

पटेलः—इतोऽपि किल सन्तोष्टव्यमस्माभिः यद् भारतदेशस्य द्विधामात्रविभाग एव स्वराज्यदानसमयतया उपस्थितः ।

गान्धिः—न तु पुनः ?

पटेलः—न तु पुनरेवं कृतः समयः 'शतषट्कदेश्यानि किल सन्ति राज्यानि भारते; अतः तत्सङ्ख्यया विभक्तव्योऽयं देश' इति ।

गान्धिः—(विहस्य) नूनमेवं कर्तव्यस्समयः, न जाने कुतो वा विस्मृतं तैरिति । बहुभिः किल अस्मदीयैरप्यन्वमोदिष्यतेदम् ।

नेहरुः—वरं देशद्विधाविभागाङ्गीकारः, यावदेते तादृशमपि कञ्चित् समय

नोपचिक्षिपेयुः। श्रुतं मया 'एते किल सर्वान् राज्यपालकान् रक्षाप्रतिज्ञादिना स्वपक्षीयान् कुर्वन्तः तानपि द्वितीयं देशैक्यभङ्गकारणं कुर्वन्ति' इति।

पटेलः—निहतपूर्व एव किलायं पन्था आङ्गलेयानाम्।

यतः—

अन्योन्यस्य विरोधभावमधिकं संवर्ध्य कञ्चिन्नृपं
कृत्वात्मीयमथान्यदुर्बलनृपानुत्खाय राज्यश्रियः।
घ्नन्तोऽन्ते सुहृदं नृपालमपि ते ह्यांग्लाः पुरा भारतान्
जित्वा देशमलूलुटन् कथमिमामद्य त्यजेयुर्मतिम्॥२५॥

नेहरुः—अथवा, कुतो वा निन्द्यन्तामेते? नूनमस्मद्देशीया एवापराधिनः। ये—

मौर्यादिभूमिपतिनीतिसुसंहता या
सैवाद्यदुर्बलतरा भरतावनिर्नः।
हेतुश्च भेदमतिरेव किलेति सर्वे
जानन्ति तां परिहरन्ति तथापि नैते॥२६॥

पटेलः—विदेशीयदत्तरक्षाणां, स्वशक्तिविहीनानां, निर्दयपीडितप्रजानामेतेषां भूपालंमन्यानां नाममात्रश्रवणेनैव दन्दह्यते मेऽन्तरात्मा।

भोगैकायत्तचित्तास्ते राजधर्मविवर्जिताः।
आंग्लभृत्या नृशंसाश्च कथ्यन्तेऽहो नृपा इति॥२७॥

गान्धिः—मा मैवम्। विदेशीयपालनधन्यंमन्यैरन्यैरस्मद्देशीयैः साधारणदोषान् कांश्चिदेव राजब्रुवान् मनसि कृत्वा नैवं सामान्यतस्सर्वेऽपि राजानः निन्दनीया भवता। वयमिव अनेके राजानः स्वराज्याभिलाषिणः समयार्थं प्रतीक्षन्ते। आङ्गलेयैः प्रदर्शितमनुग्रहमपि अवमानतयैव चिन्तयन्तः, स्ववंशीयानां विक्रमभेदादीन् स्मरन्तः, कथमपि जीवितं यापयन्तः कति वा न दृश्यन्ते राजानः अद्यापि।

पटेलः—सत्यमाह भवान्। परन्तु कैश्चिद्राजापसदैर्भृशं पीड्यमानानां प्रजानां बाधाः प्रत्यक्षतः पश्यन्नहं क्रोधावेशवशेनैवं वदामि। सर्वथापि सर्वाण्यप्येतानि राज्यानि एकीकर्तव्यानि यदि सर्वस्यापि भारतस्य श्रेयः अपेक्ष्यते।

गान्धिः—आस्तां तावदिदं सर्वम् । स्वराज्यप्राप्त्यनन्तरभावी किलाऽयं सर्वो विचारः ।

नेहरुः—स्वराज्यप्राप्तिः पुनरवश्यंभावी । अद्यैव प्रभृत्यस्माभिः परिपालनारीतिः अमेरिका-रूसप्रभृतीनां देशानामिव चौन्नत्यं सम्पादयितुं कालावधीनां निर्णयः अन्ये च विषयाः आलोचनीयाः ।

पटेलः—पणकरद्वया किल रूप्यकाणि सञ्चीयन्ते । प्रथमं देशपालनास्वास्थ्यं ततश्च विदेशीयाभिवृद्धेरनुकरणं कर्तव्यम् ।

नेहरुः—रूप्यकेषु पणकानामस्त्यनुप्रवेशः । पणकेष्वेव दृष्टेः केन्द्रीकरणे तेषां रूप्यकभावप्राप्तिः संदिग्धैव । सर्वमपि अग्रतो निधाय देशविशेषाणामभिवृद्धिश्चिन्तनीयाऽस्मिन्काले ।

पटेलः—उपहासास्पदा अस्माकम् अमेरिका-रूसादिभिः स्पर्धापि ।

नेहरुः—का वाऽत्र स्पर्धा ? को वाप्युपहासस्यावकाशः ?[1] सप्तवर्षप्रणालिकारीत्या किल तादृशीं यान्त्रिकताभिवृद्धिं साधयतां रूसदेशीयानां चत्वारिंशद्वर्षाणि संवृत्तानि । दीयतामस्माकं त्रिंशद्वर्षाणि समयः, दृश्यतां कथं वा भविष्यत्यस्माकं देश इति । मनुष्यकर्तृकैव खलु देशस्योन्नतिरवनतिर्वा ।

गान्धिः—(विहस्य) व्यर्थोऽयं भवतोर्विवादः । उभावपि यथार्थवचनौ । यतः—

व्यक्तिः समाजतन्त्रा व्यक्तेस्तन्त्रस्तथा समाजोऽयम् ।
एवञ्च देशजगती काले ह्यस्मिन् विशेषतो दृष्टे ॥२८॥

परन्तु देशस्य यान्त्रिकतापादने पुनः अवहितचित्तैरेव भवितव्यम्, यथेयं यान्त्रिकता न मानवतां विनाशयेत् ।

नेहरुः—परस्परविरुद्धं किलेदं भाषितम्, अयान्त्रिकता अभिवृद्धिश्चेति ।

गान्धिः—यान्त्रिकतया न कोऽपि मे विरोधः । तत्सहजान् दोषान् प्रहातुं प्रथमतः प्रयतितव्यमित्येवाऽहं ब्रवीमि । यतः—

---

1. "To Khruschev and Bulganin, who boasted of Russia's 'wonderful achievements', he (Nehru) said, chiding them gently, "After all Russia took forty years to get the machines running. Give me thirty years."

"J. Nehru' P. 440.

भोगलिप्सा तयाऽतृप्तिः स्वार्थचिन्ता च निर्दया ।
सौहार्दस्य विनाशश्च यन्त्रिकत्वसहोदराः ॥२६॥

अतश्च यान्त्रिकतायास्तावानेवानुप्रवेशोऽस्माकं देशे युक्तः यावता चिर-संरूढाऽस्माकं संस्कृतिः न विनश्येत् ।

नेहरुः—(सवैलक्ष्यस्मितम्) क्षुद्बाधानिवारणानन्तरं किलाऽस्याः संस्कृतेः विचारः ।

गान्धिः—सर्वैरुपवासः कर्तव्य इति नोच्यते मया । परन्तु भोजनार्थमेव जीवितव्यमित्येव न बोधनीयाः प्रजाः । यतः—

नूनं दीर्घास्तव मम मते द्वित्रिसंख्याः शताब्द्यः
ता एवाब्धौ सलिलकणिका ह्यन्तहीनेऽत्र काले ।
गण्योऽन्यैः स्यात् स खलु विषयोः यः स्वधर्मैकवित्तो
नैवं भोगै र्न च धनगृहै र्नापि शस्त्रै र्न चास्त्रैः ॥३०॥

अत एव पुनः पुनर्बोध्यते मया इण्डोचीनजापानादिविदेशेष्वपि चिरादधिगतप्रचारश्चिरन्तनोऽयमस्माकं धर्मो यथा सुरक्षितो भवति तथाऽस्माकं यान्त्रिकता सम्पादनीयेति ।

नेहरुः पटेलश्च—तथैव करिष्यामः । को वाऽमूढः स्वदेशीयां संस्कृतिं परित्यक्तुमभिलषति ?

गान्धिः—नूनमियं संस्कृतिरस्माकं गर्वकारणं यस्याः किल चिह्नानि विदेशेष्वपि व्याप्तानि दृश्यन्तेऽद्यापि । यतः—

नैके श्रीरामनाम्ना कतिचन नगराण्याह्वयन्त्याफ्रिकायां
मेस्पाटोम्याश्च मूर्तिर्वृषभवरयुताऽलम्भि गङ्गाधरस्य ।
अद्याप्यास्ट्रेलियायां प्रचलति शिवलीलाभिधं नाटकं तत्
लब्धं मङ्गोलियायां सिकतिलमरुतः संस्कृत ग्रन्थजातम् ॥३१॥

अपि च —

जावाश्यामसुमात्रादेशेष्वद्याप्यतीव दृश्यन्ते ।
विष्णुशिवालयजालं चाध्वरचिह्नानि धर्मशास्त्राणि ॥३२॥

पटेल:—प्राचीनसंस्कृतिप्रसङ्गवशेन विस्मृतोऽस्माकं प्रसक्तो विषय:। अथ अस्माभि: कृतारम्भस्य 'भारतं त्यजत' इत्युद्यमस्य प्रतीकारं करिष्यन्त्याङ्गलेया:। अनन्तरञ्च किं वा कर्तव्यमित्युपदिशतु महात्मा।

नेहरु:—(सोत्प्रासम्) तन्निष्कासनं स्वराज्यपालनञ्च।

गान्धि:—निर्णीतमेवास्माभि: सर्वथाप्याङ्गलेयानां भेदोपाया विफलीकर्तव्या इति।

(नेपथ्ये कलकल:)

प्रतीहारक:—(ससम्भ्रममुपसृत्य) आर्या: त्वर्यतां त्वर्यताम्। तूलविक्षिप्ताग्निवत् देशस्य कोणे कोणे शीघ्रमेव व्याप्तेन 'भारतं त्यजत' इति उद्यमेन किल किंकर्तव्यताविमूढाः आङ्गलेयाः सर्वानेव देशनायकान् निगृह्णन्ति।

सर्वे—किञ्च?

प्रतीहारकः—त्रीनपि भवतोऽन्विष्यन्तो भटा इत एवाभिवर्तन्ते।

नेहरुः—चिरोत्प्रेक्षितोऽयं विषयः, कुतो वाऽयमन्वेषणश्रम एतेषां वराकाणाम्? इमे वयमेव गच्छामः।

गान्धिः—अनन्तरकरणीयं विचारयितुं चिरवाञ्छितेयं विश्रान्तिः।

(इति वदन् बहिर्गच्छति)

नेहरुः—मयापि कारागृहस्थेन तादृशा उपायाश्चिन्तनीया यैः कतिपयैरेव वर्षैरस्माकं देशः सर्वदेशमूर्धन्यो भवेत्।

(इति वदन् बहिर्गच्छति)

पटेलः—क्षुद्राणां राज्यानां कथं वा विशालभारतराज्ये विलयः सम्पादनीय इति पुनः पुनर्विचार्याप्यनुपलब्धमार्गस्य मे समुचितोऽयं विविक्तसमयः सम्प्राप्तः।

(इति वदन् बहिर्गच्छति)

इति द्वितीयोऽङ्कः

——

तृतीयाऽङ्कः

(ततः प्रविशतः सुरापानमदविह्वलौ रंगोजीराजः अजीजश्च, तयोश्च पश्चात् द्वावाङ्गलेयौ)

रंगोजी—वयस्य काद्यतिथिः ?

अजीजः—को वा जानाति ? पृच्छ मित्रं जॉनम्। अथवा प्रतिदिवसमेकरूपासवास्वादामिषनिगरणादिकार्याणां का वाऽस्माकं श्रोत्रियस्येव ब्राह्मणस्य तिथेरावश्यकता ?

रंगोजी—(उच्चैर्विहस्य) साधूक्तं त्वया (किञ्चिद्विचिंत्य) अरे ! मूढ़ ! भारतीया तिथिः चिरपरित्यक्ता हि मया। आङ्गलेयदिवसं पृच्छामि।

अजीजः—वयस्य जॉन ! कथयास्मै को वा अद्य दिवस इति।

जॉनः—अष्टाविंशतितमोऽद्य दिवसः।

रंगोजी—स्मरामि विंशतितमे अत्रागतावावाम्। एक एव किल सप्ताहः संवृत्तः।

ड्रिंकवाटरः—किमेक एव सप्ताह इति ? दिसम्बरमासे किलागतो भवान्।

अजीजः—राजप्रतिनिधेरादरविशेषेण तद्भवने यापितः कालोऽपि विस्मृतोऽनेन मूर्खेण। एको वत्सरः किल पूर्णं अत्रागतयोरावयोः।

जॉनः—नहि नहि, जुलाईमास एव किल विपरिवर्तते अद्यापि ?

रंगोजी—अरे मूर्ख ! किं वा अनेन व्यर्थप्रलपितेन ? अपि जानासि कुतो वाऽहं दिवसं पृच्छामीति।

अजीजः—न खलु जानामि।

रंगोजी—त्वत्तः अहमेव वरम्। पश्य—

प्रस्थप्रमाणेन पिबामि मद्यं मांसञ्च खादामि शिरःप्रमाणम्।
भुञ्जे यथालाभमनेकनारीः कार्याणि मुख्यानि न विस्मरामि ॥१॥

अजीजः—कथय तावत् किं वा तत्कार्यं मया विस्मृतम् ?

रंगोजी—अये ! अद्यैव विस्मृतवानसि, ते अतिलोकरमणीये आङ्गलयुवत्यौ, याभ्यां किल सार्धं नर्तितमावाभ्यां संघनाट्यशालायाम् ।

अजीजः—अरे, कथं वा विस्मरिष्यामि तां मे प्रियां सिलियाम् ।

या किल—

उच्चपार्ष्णियुगरम्यपादुका
पूर्वकायगतिकम्पितोत्कुचा ।
केतकीकुसुमगर्भपाण्डुरा
नृत्यतीव पुरतोऽधुनापि मे ॥२॥

अपि च—

पानावेशाविदितसमये सङ्घनाट्ये प्रवृत्ते
विद्युद्दीपे झटिति शमिते मे तदा भाग्ययोगात् ।
बाह्वोर्मध्ये दृढतरयता साऽर्धनग्नोच्चवक्षा
गाढाश्लेषैर्दृढतरकुचोत्पीडमापीड्य रेमे ॥३॥

रंगोजी—स्मारं स्मारं किलाभिनन्दामि तं रात्रिवृत्तान्तम्—

तस्या भर्त्ता युवतिमितरां नर्तयन् दूरतोऽभूत्
प्राप्तैषा मां श्रमजललवक्लिन्नखण्डेन्दुफाला ।
दृष्ट्वा रक्तं वदननलिनं व्यस्तसौवर्णकेशं
निक्षिप्तं तन्मदुरसि परां मोदकाष्ठामवापम् ॥४॥

नूनं नागरिकतायाः परा हि काष्ठा स्त्रीपुरुषसङ्घनाट्यं नाम । एतदभाव एवाऽस्मद्देशे विविधानां कलहानां पतनस्य च मूलम् ।

यत :—

भार्येयं मम सैष मे पतिरिति त्यक्त्वाल्पबुद्धिं सुखं
क्रीडन्त्यत्र विशालसौम्यहृदयाः सर्वे पुमांसः स्त्रियः ।
स्त्रीहेतोः कलहः कदापि न ततः स्यादाङ्ग्लदेशेऽखिले
ही मूर्खाः खलु भारताः कुचरिता रीतिं गता ये न ताम् ॥५॥

अजीजः—कथं वा ज्ञायते त्वया आङ्गलदेशे स्त्रीनिमित्तः कलहो नास्तीति। तत्रापि किल विवाहविच्छेदः अधिकतरं श्रूयते।

रंगोजी—तत्र पुनरनेकानि कारणान्तराणि स्युः न पुनरेतादृशी संकुचिता दृष्टिः। संशयश्चेत् पादं पृच्छ (इति ड्रिंकवाटरं निर्दिशति)

ड्रिंकवाटरः—मम नाम ड्रिंकवाटरः, न पादः।

रंगोजी—जॉनुः किलायं ते सखा। तवापि नाम पादो भवतु।

ड्रिंकवाटरः—यथेष्टमाह्वयतु मां भवान्। (किञ्चिद्विमृश्य) यथार्थं कथ्यते मया। एतादृशेषु सङ्घनाट्यादिषु दृश्यमानं प्रेमेति न भ्रान्तव्यं भवता। मदावेशः किलैषः। अयमेव चावेशः दाम्पत्यजीवनेऽपि प्रविष्टः। आवेशे च शान्ते विवाहविच्छेदादयः सम्भवन्ति इति भारतीया दाम्पत्यरीतिरेव यथार्थप्रेममूलमिति वदन्ति केचिद् अस्मद्देशीया अपि।

रंगोजी—(उच्चैर्विहस्य) अद्यैव ज्ञातं मया भारतीयतुल्या मूर्खास्तस्मिन्नपि देशे वर्तन्त इति। मनुष्यपरिकल्पिताः कृत्रिमा एते बन्धाः छेदनीयाः। तदैव विश्वश्रेयो भवेत्।

अजीजः—अत एव किल केचित् मनुष्यपरिकल्पितं वस्त्रधारणादिकमपि परिहृत्य प्रकृतिसहजा जीवनरीतिरनुसर्तव्येति बोधयन्ति तथैव चानुतिष्ठन्ति पाश्चात्त्यदेशेषु।

रंगोजी—कः संदेहः! तदेव यथार्थं स्वातन्त्र्यमिति मे विनिश्चयः।

ड्रिंकवाटरः—स्वनयनस्थाञ्जनशोभेव भारतीयसंस्कृतेर्विशेषो नैव दृश्यते भवद्भ्याम्।

रंगोजी—हन्त! त्वमप्याविष्टोऽसि अनेन भारतीयसंस्कृतिपिशाचेन।

जॉनः—(अपवार्य) प्रलपतां यत्किञ्चिदेतौ मूर्खौ, किं न शिन्नम्? कदाचिदनयोः प्रत्युत्तरदानमस्माकं धनसंग्रहे विघ्नो भवेत्।

ड्रिंकवाटरः—(विहस्य) अयःपिण्डीभूय किलोपविष्टो भारतविद्वेष अनयोर्मस्तिष्के। न कस्याप्युपदेश एतद् गलयितुं शक्नोति। अथवा, अतिबलवती किलाऽस्मदीयानाम् आकर्षणशक्तिः।

अजीजः—अथ तद्युवतीगतः कोऽपि वृतान्तो ज्ञातः ?

रंगोजी—किं ज्ञात इति, सर्वमपि सज्जं कृतम्, त्वमपि सन्नद्धो भव अस्मत्सुनीतिफलोपभोगाय।

अजीजः—(सहर्षम्) कथय कथय विस्तरेण।

रंगोजी—ते तावदस्माकं राजप्रतिनिधेर्भागिनेय्यौ। सभर्तृके किल ते भारतदर्शनार्थमायाते विहारयात्रायाम्।

अजीजः—अस्मदनुग्रहार्थमिति भण। कियद्वासिष्यंते अत्र ?

रंगोजी—आगामिमासे प्रथमसप्ताह एव किल ते स्वदेशं निवर्तिष्येते।

अजीजः—हन्त ! इयत् शीघ्रम्।

रंगोजी—अलं विषादेन। (आङ्गलेयौ प्रदर्शयन्) अनयोः साहाय्येन सर्वं तथा सम्पादितं यथा न ते स्वदेशगमनवार्तामपि स्मरिष्यतः। स्वभर्तृभ्याञ्च विवाहसम्बन्धमुच्छिद्य........

अजीजः—(ससम्भ्रमम्) उच्छिद्य च...

रंगोजी—आवामुद्वहिष्येते।

अजीजः—प्रियं मे प्रियं मे, परन्तु कथं वा मन्येत राजप्रतिनिधिना इति शङ्कितोऽस्मि।

रंगोजी—अलं विचार्य। ताभ्यामङ्गीकृते किं वा करोत्यसौ ? अयमेव आङ्गलेयानां विशेषः। अपि चास्माकं स्नेहमपेक्षमाणः असौ अनुमोदिष्यते एवेममुद्वाहम्।

आङ्गलेयौ—सत्यमुक्तं भवता। बहुशः किल श्रुत आवाभ्यां राजप्रतिनिधिः भवतोरैश्वर्यबलादिकं प्रशंसन्।

उभौ—गुणग्राही किल राजप्रतिनिधिः।

अजीजः—वयस्य, कथय कथय, किमङ्गीकृतमाभ्याम् आवां परिणेतुम् ?

रंगोजी—अद्यापि ते संशयः ? शृणु यथावृत्तं ते कथयामि। प्रत्येकशस्ताभ्यां लक्षरूप्याणि पारितोषिकतया प्रेषितानि। तान्यङ्गीकृत्य प्रत्यक्षत एव विवाहादि-

निर्णयं कर्तुं त्रिंशतितमे दिवसे समागमिष्याव इति वार्ता प्रहिता प्रियाभ्याम्। अत एव किलाऽद्य मया दिवसः पृष्टः।

अजीजः—(सस्मितम्) अहो मित्रार्थे तवौदार्यम्। यन्मन्निमित्तमपि त्वयैव व्यथितं धनम्।

रंगोजी—अये! अलं वृथास्तवेन। शीघ्रमेव प्रतिदातव्यं तद्धनम्। किं न जानासि न कदाऽप्यन्यार्थे एकमपि पणकं व्ययीकरोति रंगोजी विना निश्चितं स्वप्रयोजनमिति।

न पिता नापि वा माता न पुत्रो न च बान्धवाः।
न कलत्रं न वा मित्रं पावनं धनमेव नः ॥३॥

अजीजः—(विहस्य) अरे यदीच्छसि सकुसीदं गृहाण। किं धनव्ययभीरुं मन्यसे मां विशेषतश्चैतादृशे कार्ये? भवतु, अथ केनानीतेयं वार्ता?

रंगोजी—अनेनैव (इति जॉन निर्दिशति, जॉनः स्मितं करोति)

अजीजः—अहो राजप्रतिनिधित्वयोग्या ते बुद्धिः।

ड्रिंकवाटरः—तत्प्राणसखः किं भवानपि राजप्रतिनिधित्वं नार्हसि?

रंगोजी—कः सन्देहः? (अजीजं प्रति) तस्मिन् दिवसेऽस्मत्प्रेमचिह्नतया प्रत्येकशः लक्षद्वयं दास्याव इति वार्ता प्रेषिता मया।

अजीजः—किं लक्षद्वयमिति? सर्वस्वमपि दास्यामः।

आङ्गलेयौ—लोकविदितं भवतां भारतीयराजानामौदार्यम्।

ड्रिंकवाटरः—(किञ्चिद्विचिन्त्य) कोऽपि संदेहः। नियमप्रियाः किल भारतीयाः। कथं वा भवतोः प्रजा विदेशीयविवाहमङ्गीकरिष्यन्तीति।

अजीजः—अपि भोः का शक्तिरेतेषां कीटकानामस्माकं मुखमपि द्रष्टुम्?

जॉनः—सत्यमुक्तं कीटकराजेन।

अजीजः—(सगर्वमिव) एवमिदम्। (विचिन्त्य) अये! किमुक्तं कीटकराजेनेति।

रंगोजी—(विहस्य) कीटकाः किल ते प्रजाः, तासाञ्च त्वं राजा। (जॉनं

प्रति) नूनम् आङ्गलेयानां सहजा परिहासशीलता प्रदर्शिता त्वया । (विचिन्त्य) मूढा भारतीयाः परिहासं कर्तुं मन्यैः कृतम् आस्वादयितुं वा न शक्ताः ।

अजीजः—(विहस्य) नूनमाङ्गलेयसंसर्गभवेयमस्माकं परिहासस्वादचातुरी ।

ड्रिंकवाटरः—(अपवार्य) भो ! मैतादृशं परिहासं कुरु । अस्माकं कार्यं भग्नं भवेत् ।

जॉनः—(अपवार्य) मा भैषीः । सर्वमप्याङ्गलेयसम्बद्धम् अत्युत्तममेवैतौ मूढौ मन्येते ।

रंगोजी—जॉन ! नोक्तं भवता त्रिंशतितमे दिवसे कथं वा प्रियासमागमो भविष्यतीति ।

जॉनः—तदेव वक्तुकामोऽस्मि । तस्यां सङ्गनाख्यरात्रौ अयं ड्रिंकवाटरः विद्युत्प्रसारं तथा विच्छिन्नं करिष्यति यथा घटिकार्धपर्यन्तं न सुसन्धं भवेत् । ततश्च भवन्तौ समीपस्थेऽपवरके प्रियाभ्यां प्रत्यक्षतः स्वयमेव विवाहादिनिर्णयं करिष्यतः ।

उभौ—सुचिन्तितोऽयमुपायः । तथैव करिष्यावः ।

ड्रिंकवाटरः—व्यवहारेऽस्मिन् आवयोः सम्बन्धः विस्मृत्यापि न कस्मैचिदपि निवेदनीयः । नूतनो हि राजप्रतिनिधिः किञ्चिदिव गम्भीरतरो दृश्यते । तस्यैव च भागिनेय्यौ एते ।

उभौ—किमेतादृशेष्वप्यावयोरुपदेष्टव्यम् ? कार्यानन्तरं द्रक्ष्यथः अस्माकमनुग्रहः कथं वा भविष्यतीति । अद्य पुनरेतावद्गृह्यताम् । (इति ताभ्यां किञ्चिद्धनं दातुं हस्तौ प्रसारयतः)

आङ्गलेयौ—मा मैवम् । अविदितचरमाङ्गलेयानामुत्कोचग्रहणं नाम । महाराजाभ्यामपि भवद्भ्यां प्रदर्श्यमानया समानताप्रतिपत्त्यैव अनुगृहीतावावाम् ।

रंगोजी —किमत्राश्चर्यम् । आङ्गलेयौ किल भवन्तौ सर्वेभ्योऽप्यादरमर्हतः । यतः—

भाषायामथवा वेषे शयनासनभोजने ।
क्रीडायां व्यवहारे वा गुरुराङ्गलेय व एनः ॥७॥

गम्यतां मित्रकार्यसिद्धयै ।

आङ्गलेयौ—स्वकार्यसिद्धयै इत्युच्यताम् ।

रंगोजी—सत्यमिदम् । मित्रकार्यमेव हि स्वकार्यमाङ्गलेयानाम् ।

[आङ्गलेयौ निष्क्रान्तौ]

अजीजः—अहो स्वार्थचिन्ताराहित्यमाङ्गलेयानाम् ।

यतः—

न किञ्चिदेते कांक्षन्ति धनं दत्तमपि स्वयम् ।
न चापि परिगृह्णन्ति जातु भारतभिक्षुवत् ॥८॥

सर्वदा सत्यमिदं । उन्नता बुद्धिरुन्नतमेवापेक्षते इति ।

रंगोजी—वयस्य ! पश्य कथं वा साधितप्रायमावयोर्वाञ्छितमिति ।

अजीजः—कोऽत्र संदेहः, बृहस्पतिरसि बुद्धया ।

रंगोजी—अये ! पुनरपि तदेव ! कतिधा वा न कथितं मया, तादृशानां मूढविश्वासप्रतीकानां पुराणपुरुषाणां बृहस्पतिदिवसपतीत्यादीनां नामानि न ममाग्रतो ग्रहीतव्यानि इति ।

अजीजः—सकारणमेव किलाहं तदा तदा एतादृशानि हिन्दूपुराणपुरुष-नामानि उदाहरणतया गृह्णामि ।

रंगोजी—किं तत् कारणम् ?

अजीजः—बहवः किल भारतीया मतं निमित्तीकृत्य कलहायन्ते । ते जानन्तु कथं वा आवां मतमूर्खताबहिर्भूताविति । त्वयापि तदा तदा महम्मद-प्रभृतीनां नामानि उदाहर्तव्यानि ।

रंगोजी—साधूक्तं त्वया । (किञ्चिद्विमृश्य) अथवा अङ्गीकृते किल कस्मिंश्चिन्मते मतविरोधप्रसङ्गः; अस्माकं पुनरिदमेव मतं यत् मतस्याऽभावः । यतः—

प्रजा निपीड्यापि धनं प्रभूतं सङ्गृह्यते नित्यमकुण्ठिताशैः ।
आंग्लेयदत्ताभयवीतशङ्कैः सुखञ्च भुज्यन्त इमे हि भोगाः ॥९॥

अजीजः—प्रजापीडनमित्यनेन स्मारितोऽस्मि । प्रजाहितंमन्यः किल

राजा वासवसेनो द्वित्रिवारं राजप्रतिनिधेर्गेहमायातोऽस्मिन्मासे। पूर्वं न कदाप्यस्यात्र प्रवेश एवाऽऽसीत्। न जाने कथं कुतो वाद्याऽस्य प्रवेशो दीयते।

रंगोजी—अयमेव ममापि संशयः। नूतनोऽयं साधुशीलोऽपि राजप्रतिनिधिः न जाने कुतो वा एतादृशानां राजविद्रोहिणां स्थानं ददाति।

अजीजः—अहं तु मन्ये, पूर्वापराधक्षमापणार्थमागतेनानेन भवितव्यमिति।

रंगोजी—कथं ज्ञायते?

अजीजः—पूर्वं किलायं स्वराज्ययोद्धृणां केषाञ्चिद् देशनायकंमन्यानां साहाय्यं कुर्वन् कालान्तरे महान्तं लाभमपेक्षमाण आसीत्। अद्य तु सर्वास्तस्याशा भग्नाः।

रङ्गोजी कथमिव?

अजीजः—किं न जानासि त्वम्, सर्वे खल्वेते देशनायकंमन्याः कारागारेषु विश्राम्यन्तीति।

रङ्गोजी—कथं न ज्ञातम्? तस्मिन् किल दिवसेऽस्माभिरानन्दसूचकः आपानोत्सवः कृतः।

अजीजः—साधु स्मारितं त्वया। तस्माद्दिवसादारभ्याऽसौ वासवसेनः किंकर्तव्यताविमूढः कालं यापयति। प्रजानां धनं प्रजानां धनमिति वदन् मूर्खः तदर्थमेव सर्वं व्ययीकुर्वन् सुखं भोगानपि नानुभवति।

रङ्गोजी—(विहस्य) न खलु सर्वोऽपि भोगान् भोक्तुं शक्नोति। तत्रापि किल योग्यता अपेक्ष्यते। पश्य—

धर्मार्थे कतिचिन्मूढाः प्रजार्थमिति चापरे।
कीर्त्यर्थमिति चाप्यन्ये वृथा कुर्वन्ति जीवितम् ॥१०॥

अथ किं वास्यागमनकारणमुत्प्रेक्षसे?

अजीजः—अद्य सर्वविदितः किलास्य राजविद्रोहिभिः सम्बन्धः। तत्रापि देशीयराजानामाजन्मवैरी किल पटेल अस्य परमं मित्रम्। ज्ञातवृत्तान्तेन राजप्रतिनिधिनाऽयमाहूतो भवेद्दण्डनार्थम्।

रङ्गोजी—युज्यते, अथवा राजप्रतिनिधिमेव पृच्छामः किमर्थमागतोऽयमिति।

अजीजः—परन्तु अद्यत्वे राजप्रतिनिधिः एतादृशानां प्रश्नानां प्रत्युत्तरमेव न ददाति। कथं वा पृच्छ्यताम्?

रङ्गोजी—अये! अविदिताङ्गलेयस्वभाव इव भाषसे त्वम्।

अजीजः—कथमिव?

रङ्गोजी—सकृद्दत्ताभया एते एतादृशविषयनिवेदनेन नैवाऽस्माकं मनोव्याकुलीकर्तुमिच्छन्ति।

अजीजः—सत्यमुक्तं त्वया। भवतु, विहितास्मद्रक्षासंविधाने राजप्रतिनिधौ कुतो वा आयास्यते आत्मा एभिस्तर्कैः? (दूरतो दृष्ट्वा) अये इत एवागच्छत्यसौ वराकः।

रङ्गोजी—(दृष्ट्वा) एवम्, अस्य दर्शनं परिहरिष्यावः। प्रजाः, धर्मः, ऐकमत्यमित्यादि किञ्चित् प्रलपन्नयं मूढः चिरेणापि नाऽस्मांस्त्यजेत्।

अजीजः—दृष्टावेवावामनेन। न युक्तमद्यापसर्तुम्। तस्यागमनप्रयोजनमपि किल ज्ञातव्यमस्माभिः।

उभौ—(हस्तमुद्यम्य) अये, स्वागतं वासवसेन महाराज! कदा वा आगतो भवान्?

वासवसेनः—(उपसृत्य) अहो भवन्तौ! अपि कुशलं भवतोः? ह्य एव किल रात्रावागतोऽस्मि।

रङ्गोजी—(सोत्प्रासमिव) मन्ये सत्कारार्थमाहूतो राजप्रतिनिधिना।

वासवसेनः—(किञ्चिद्विचिन्त्य) न सत्कार इति, सत्कार्यमित्युच्यताम्।

अजीजः—किं तावदिदं सत्कार्यम्?

वासवसेनः—अनावृष्ट्यादिभिः देशोपप्लवैरस्माकं राज्ये महती सस्यक्षतिरासीत्। अतः प्रजाभ्योऽस्मिन् वर्षे करो न ग्रहीष्यते, अतश्च न दास्यते आङ्गलराजभागोऽपीति विज्ञापयितुं प्रषितोऽस्मि। अङ्गीकृतञ्चैतद्राजप्रतिनिधिना।

अजीजः—(अपवार्य) अये! पश्य कथं वायमलीकमहङ्कारं प्रदर्शयत्यस्माकं पुरतः।

रङ्गोजी—(अपवार्य) एवमिदम्। को वा न जानाति, न कदाप्याङ्गलेया एतादृशं राज्यनाशकारिमार्दवं भारतीयेष्वनुसरेयुरिति।

लालनाद्बहवो दोषाः पीडनाद्बहवो गुणाः ।
भारतीयान् सदा तस्मात्पीडयेन्न तु लालयेत् ॥११॥

इति किल तैश्चिरादनुसृता नीतिः । (प्रकाशम्) तदा महान् सत्कार एव ।

वासवसेनः—(साक्षेपम्) आम् , नूनं सत्कार एव; परन्तु न तादृशः सत्कारः यथा प्रथमतः समुद्दिष्टो भवता ।

रङ्गोजी—(अपवार्य) अनेन ज्ञात एवास्माकमन्तरार्थः । भवतु, (प्रकाशम्) नूनं योग्यतमो भवान् एतादृशानां सत्काराणां यो हि दिवारात्रं प्रजाक्षेमार्थं प्रयतते ।

वासवसेनः (अन्तर्गतमधिक्षेपमजानन्निव) कोऽत्र विशेषः ? पश्यतु भवान् --

यद्यस्मानिह मानयन्ति कतिचिद्दीप्यद्गुणास्सज्जनाः
तेषां हेतुरुदारताऽत्र महती नास्मत्प्रभावस्त्वयम् ।
येऽस्मद्दोषगणं स्वभावविहितं निन्दन्ति मित्राणि ते
याथार्थ्यस्य निवेदनान्ननु वृथा क्रुध्येम तेभ्यो वयम् ॥१२॥

अजीजः—[आत्मगतम्] अस्मद्वाक्यं यथार्थं मन्वानोऽयमुपदेशदानार्थं प्रवृत्तः ।

रङ्गोजी—न चेत्कुप्यति भवान् किञ्चित्प्रष्टुकामोऽस्मि ।

वासवसेनः—अनियन्त्रणानुयोगोऽयं जनः सर्वेषामपि । यथेष्टं पृच्छयताम् ।

रङ्गोजी—प्रजाक्षेमः प्रजाक्षेम इति किल नित्यमुद्घोष्यते भवता, कुतो वा न स्वक्षेमोऽप्यालोच्यते ? स्वसौख्यं विना किं वास्य फलं राज्यस्य ।

वासवसेनः—(विहस्य) किमिदं राज्यं नाम ?

रङ्गोजी – (विचार्य) राज्यम्........राज्यं नाम राज्यमेव ।

वासवसेनः--(विहस्य) न जानाति भवान् । उच्यते मया, श्रूयताम् । राज्यं नाम प्रजा एव । प्रजासमृद्धिरेव राज्यसमृद्धिः, तद्विनाश एव राज्यनाशः । एवं स्थिते प्रजाक्षेमं विना राज्यक्षेमः राजक्षेमो वा कथं भवेदिति भवानेव कथयतु ।

रङ्गोजी—भो ! अविचारितरमणीयं ते वचनम् । दृश्यतामुदाहरणतया अस्माकं क्षेमस्य को वा लोपः ?

वासवसेनः—(किञ्चिन्मन्दमिव) अचिरेणैव ज्ञास्यते ।

अजीजः—'नाविष्णुः पृथिवीपति' रिति देवांशसम्भूतः किल राजा उच्यते । अतश्च प्रजाभी राजैव पूजनीयः न पुना राज्ञा प्रजाः ।

वासवसेनः—अहो ! सम्यग्दर्शितस्ते शास्त्रपरिचयः । तदेव शास्त्रमुपदिशति 'प्रजारञ्जनमेव राज्ञः परमो धर्मः, दुष्टश्च राजा राज्यादुन्मूलनीय' इति ।

रङ्गोजी—अये प्रक्षिप्तमिदं सर्वम् ।

वासवसेनः—(विहस्य) अस्मद्विचाराननुगुणं सर्वमपि प्रक्षिप्तमेव ।

रङ्गोजी—कः सन्देहः ! जन्मतः सिद्धमस्माकमधिकारं छेत्तुमेवेत्थं लिखितं कैश्चिद्दुरात्मभिः ।

वासवसेनः—कथं जन्मसिद्धमिति ! तावदेव हि जन्मतः सिद्धता अधिकारस्य यावत्तत्र योग्यता न हीयते । अपि च कति वा नासन् औरङ्गजीवमुखाः सम्राजः ये प्रजाधनमिति कृत्वा कोशादेकमपि पणकमगृह्णन्तः विरामसमयेषु उष्णीषनिर्माणपुस्तकलेखनादिभिः स्वयं धनमर्जयन्ति स्म ।

अजीजः—किं द्वित्रा मूढाः सन्तीति सर्वैरपि मूढैः भवितव्यम् ?

वासवसेनः—के वा मूढा इत्यचिरेणैव ज्ञास्यते । लब्धे च स्वाराज्ये नैवैतादृशानां विचाराणामवकाशः ।

रङ्गोजी—इयमपरा मूढता । सर्वथा असम्भावनीयमिदं यद्भारतस्य स्वराज्यं नाम ।

वासवसेनः--(विहस्य) अहो न ज्ञायते भवद्भ्यामाधुनिकी राजकीयपरिवृत्तिः । अथवा, किमित्यात्मानमायासयामि श्वपुच्छावनमने । युवयोर्यथाभिमतं तथैव चिन्त्यताम् । साधयामस्तावत् ।

(इति गच्छति)

उभौ—किं श्वपुच्छमिति ? गच्छ रे तुच्छ । स खलु निन्दनीयो राजप्रतिनिधिर्यस्तेऽविनयं न दण्डयति ।

रङ्गोजी—वयस्य ! आगच्छ; यथासमयं निवेदयावोऽस्याऽहंकारं राजप्रतिनिधये । (इति गच्छतः)

[सर्वे निष्क्रान्ताः]

इति तृतीयोऽङ्कः

——

चतुर्थोऽङ्कः

(ततः प्रविशति चर्चिलः तस्य भार्या च)

भार्या—किमिदम् ? अद्य भवान् किञ्चिद्विमनायमान इव दृश्यते । स्वपक्ष-पराजयदिवसेऽपि नैवंभूतो दृष्टो भवान् !

चर्चिलः—प्रिये ! एवमिदम् । न खलु न विदितमिदं ते यन्मत्पक्षस्य जय-पराजयौ नैव मे हर्षविषादयोः कारणमिति, यावदस्मद्देशस्योन्नतिः न परिक्षीयते, तावद् यः कोऽपि वा भवतु पालकः पक्षः, मम महानामोद एव ।

भार्या—सर्वलोकविदिता खल्वियं भवतो देशश्रेयःप्रवणचित्तता । अत्र कीदृशो वाऽस्य विषादस्य हेतुः ?

चर्चिलः—किं वा कथ्यताम् ?

आङ्ग्लेयाद्भुतराजनीतिसुतरोर्लोकोत्तरं यत्फलम्
यस्याः सम्पदनेकवत्सरशतादानेपि न क्षीयते ।
यल्लाभोऽदिशदुन्नतिं सुमहतीं यूरोपभागे च नः
सेयं भारतभूमिरद्य गलितप्रायाङ्ग्लहस्तादहो ॥ १ ॥

भार्या—हन्त ! अस्मत्साम्राज्यलक्ष्मीमुकुटमेव किलाऽद्यापनीयते । कथं वैतत् सम्भाव्यते ?

चर्चिलः—प्रथममिदं कार्मिकपक्षीयाणामधिकाराधिगमस्य फलम् । सुष्ठूक्तं किलेदम् 'समार्जयिता एको व्ययकर्ता चापर' इति । यतः—

सोढ्वाऽनन्तं श्रममतिचिरं मित्रघातादिपापा—
दप्यत्रस्तैः स्वविषयमहौन्नत्यमात्रैकचित्तैः ।
अस्मत्पूर्वैर्विदितचरितैरार्जितं नैकवर्षे—
श्वेतद्राज्यं प्रतिददति ते काचवन्मूढचित्ताः ॥२॥

भार्या—बहुशो हि कथितं भवता भारतस्य स्वराज्यं नाम असम्भावनीय-मिति ?

चर्चिलः—कोऽत्र संदेहः। यद्यस्मत्पक्ष एवाधिकारेऽभविष्यत्.....

भार्या—परन्तु भारते आबालवृद्धं सुगृहीतमूला स्वराज्यतृष्णा कथं वा शाम्येत् ?

चर्चिलः—(विहस्य) आशामात्रेण दुर्लभं स्वराज्यम्। बलं खल्वावश्यकं राज्यसम्पादने।

भार्या—मन्ये, गन्धिनाऽनुसृतस्यासहायोद्यमस्य सत्याग्रहस्य वा साफल्ये ससंदेहो भवानिति।

चर्चिलः—कथं सन्देह इति। मम पुनरयं निश्चय एव न कदाप्येतयोः साफल्यमिति। पश्य—

तावत्सत्याग्रहस्तावदसहायोद्यमादयः।
यावन्न पात्यतेऽस्माभिरयोगोलपरम्परा ॥३॥

नैकशो हि प्रत्यक्षतोऽवगतमिदमस्माभिः जलियानबागप्रदेशादिषु।

भार्या—सुष्ठूक्तं भवता। अथवा—

न शस्त्रग्रहणे शक्तिर्नापि वा परिपालने।
स्वराज्यमपि ते लब्धं कथं रक्षेयुरक्षमाः ॥४॥

चर्चिलः—सम्यङ्मन्त्रितं त्वया। चर्चिलस्य किल भार्यासि। परन्तु यावत् स्वराज्यं न दत्तं न कापि भीतिः। दत्ते पुनः स्वराज्ये वर्तन्त एव नैके नेहरुपटेल-राजाजीप्रकाशप्रभृतयो भारतीया ये सुदृढमूलं करिष्यन्त्यचिरेण राज्यम्। (किञ्चि-द्विचिन्त्य) अथवा का शक्तिरेतेषां पञ्चषाणां भारतीयानां सुष्ठुराज्यपरिपालनाय ? यतः—

देशच्छेदकृते निरन्तरुधिरस्यौघे वहत्येकतो
नानाराष्ट्रविभिन्नभाषणकृते भेदे तुदत्यन्ततः।
जातिद्वेषविवर्धनेन च परां कुर्वत्सु वृद्धिं परे—
ष्वेतद्राज्यमये ! कथं नु सुदृढं कुर्वीत देवोऽपि वा ॥५॥

भार्या—'देशच्छेद' इत्युच्यते। किं देशविभागोऽङ्गीकृतः सर्वैं र्भारतीयैः ?

चर्चिलः—मद्दम्मदीयाः खलु पञ्चषवत्सरेभ्य अस्मत्प्रोत्साहवशेन स्वेभ्यो विभिन्नं देशं साभिनिवेशमभिलषन्ति। अनन्यगतिकैर्हैन्दवैरपि किलाऽद्याऽङ्गीक्रियतेऽयं देशविभागः।

भार्या—हन्त ! व्यर्थः किल जातो भवतो मनोरथः।

चर्चिलः—किं त्वमपि चिन्तयसि कस्मैचित् स्वप्रयोजनायैवाऽयं मम प्रयास इति।

भार्या—नैवं चिन्तयामि, परन्तु अहमिदमेव तावत्प्रष्टुमिच्छामि। अस्मद्देशीयैर्बहुभिरङ्गीकृते विषये कुतो वा भवत एतावानाग्रह इति। सर्वथापि लप्स्यत एव स्वराज्यं भारतीयैः, एवं स्थिते ऋते च तेषां विरोधान्न किमपि प्रयोजनमनेन भवत आग्रहेण।

चर्चिलः—(विहस्य) यद्येवमेव मयाप्यचिन्तयिष्यत बहोः कालात् पूर्वमेव तैः स्वराज्यमलप्स्यत, युद्धेषु चास्माभिः पराजयः। किं भिक्षुकाः क्रुध्येयुरिति नैवास्माभिर्भोक्तव्यम्।

अपि च—

तुष्यन्तु वेतरजना यदि वा द्विषन्तु
सर्वोऽपि जीवतु विदेशजनो न वाऽयम्।
नित्यं स्वदेशपरिवर्धनबद्धदीक्षः
नो चर्चिलो हि गणयेदितरस्य निन्दाम् ॥६॥

भार्या—विश्वविख्याता किलेयं भवतो देशभक्तिः। परन्तु········

चर्चिलः—किं सन्देहेन ? उच्यतां विवक्षितम्।

भार्या—यद्यन्यदेशीया अप्येवमेव स्वस्वदेशमात्रवृद्धिमभिलषेयुः ?

चर्चिलः—को वा वदति सर्वैः स्वस्वदेशभक्तैर्न भवितव्यमिति।

भार्या—तर्हि कुतो वा 'वन्देमातर' मित्येतावन्मात्रकथनेऽपि भारतीया निरनुक्रोशं दण्डिता भवता ?

चर्चिलः—उक्तं किल बहुशः [1]'दानवमपि सस्नेहमालिङ्गिष्यति चर्चिलः, यद्यनेन भविता देशक्षेम' इति ।

भार्या—तेऽपि किल स्वदेशलाभार्थं प्रयतन्ते ।

चर्चिलः—वर्ततेऽत्र महान् भेदः, अस्माभिः बलेन विजितैस्तैः नैवास्मत्प्रतिकूलं चेष्टितव्यम् ।

भार्या—अहो ! दुर्बलान् निष्कास्य तद्गृहास्कन्दनमपि कोऽपि धर्मः ?

चर्चिलः—(विहस्य) राज्यविषयेषु पुनरियमेव नीतिः । अपि च धर्मो नीतिश्चेति विभिन्नौ किलैतौ मार्गौ । पराक्रमेण स्वबलसम्बर्धनमेव राजनीतिः । एवञ्च—

स्वराज्यावाप्तये युक्तो भारतीयजनोद्यमः ।
ततो युक्ततरोऽस्माकं तन्निरोधाय च श्रमः ॥ ७ ॥

भार्या—अहो भवतः अगणितापद्धैर्यविशेषः ! मम पुनरेक एव विषयः ।

चर्चिलः—कथ्यताम् ।

भार्या—यदि सर्वेऽपि स्वस्वदेशानामेव श्रेयः काङ्क्षन्ति कथं वा लभ्येत नैकैर्मेधाविभिराशास्यमानं भुवनैकराज्यम् ।

चर्चिलः—(विहस्य) युक्त एवायं ते विषयः । मम पुनरत्र विषये सुदृढो निश्चयः । श्रूयताम्—

स्वान्स्वान्देशानतिपरिमितान्पातुमायस्यते यै—
स्तेऽमी मूर्खाः प्रकृतिसहजान् विस्मरन्तो विभेदान् ।
व्यर्थं जल्पन्त्यखिलभुवनेऽप्येकराज्यं भवेदि-
त्येतच्छ्रुत्वा कतिचन मनोराज्यवीथ्यां रमन्ते ॥८॥

भार्या—सत्यमुक्तम् । इदमेवातिमहद् यद्येते देशाः परस्परं न द्रुह्यन्ति, अन्योन्यास्कन्दनाय च न प्रयतन्ते ।

---

1. "In this he (Bose) emultaed Winston Churchill, who about the same time was declaring that he was willing to shake hands with the Devil if it meant England's salvation "J. Nehru" P.280

चर्चिलः—इदमप्यसम्भाव्यमेव । यतः—

यदि देशाः समेऽप्येते न युध्येयुः परस्परम् ।
सर्वनाशभयं ह्यत्र कारणं न तु धर्मधीः ॥ ९ ॥

भार्या – एवं चायं सम्पिण्डितोऽर्थः भवतो वचनस्य, यदि शक्यतेऽन्यदेशीया आक्रान्तव्या इति ।

चर्चिलः-नैवाऽहं वदामि बलाद्देशान्तराणामाक्रमणं कर्तव्यमिति । लब्धस्य-स्थिरस्याधिकारस्य परित्यागः पुनः मूढत्वमेव ।

भार्या—अधिकारस्य स्थिरत्वे पुनः भवदुक्तमेव । परन्तु यद्ययमस्थिरः ?

चर्चिलः—प्रायस्त्वया चिन्त्यते भारतेऽस्माकमधिकारोऽस्थिर इति ।

भार्याः—अथ किम् । क्रमेण किलाद्यत्वे शिथिलतरः संवृत्तोऽस्माकमधिकारः ।

चर्चिलः—हन्त ! एवमेव चिन्तयित्वा अस्मद्देशीयाः तेभ्यः स्वराज्यं यच्छन्ति । यद्यहमेवाद्यापि प्रधानसचिवोऽभविष्यम्…

भार्या—किं तदा ?

चर्चिलः—तदा अज्ञास्यतास्माकमधिकारः परिक्षीणो वा न वेति ।

भार्या—किं वा कथयेयमत्राहमल्पज्ञा । परन्तु—

'न स्थातव्यमिहाऽशु भारतभुवं सन्त्यज्य याते'ति तै-
स्साक्रोशं कृतभर्त्सनैः प्रतिपदञ्चाबालगोपालकम् ।
दृष्टाः शत्रुतया कृतावसतयो दूरे स्वदेशादमी
रक्षां तत्र कथं नु कुर्युरखिलामाङ्ग्लाश्चिरं कथ्यताम् ॥ १० ॥

चर्चिलः—अहो ! वाङ्मात्रायुधानां भारतीयानामपि बलं प्रशस्यते त्वया ? येषां बहुसंख्याकाः

बद्धा नैकशताब्दीयदास्यशृङ्खलया दृढम् ।
बन्धं हि बहु मन्यन्ते पञ्जरस्थाः शुका इव ॥ ११ ॥

एवं स्थिते कतिचित् पञ्चषाणां नायकंमन्यानां वचनैश्चोदिता गड्डलिकावत्ताननुसर्तुमिच्छन्ति । निगृहीतेषु च नायकेषु एतेऽपि सुखं स्वप्स्यन्ति गोष्ठेषु ।

भार्या—सर्वानन्यान् प्रत्येवं वक्तुं शक्यते, न पुनर्भारतीयान्। एते हि तस्मिन् देशे जाताः यत्र ज्ञानज्योतिरिदंप्रथमतया उद्योतितमासीत्। सर्वेष्वपि च देशेषु पुरातनानि तेषां नागरिकतायाः धर्मस्य च प्रचारचिह्नानि समुपलभ्यन्ते अद्यापि।

चर्चिलः—(विहस्य) पितामहो महापुरुष इति किं पौत्रेणापि तथैव भवितव्यमिति नियमः? अत एव कश्चिदाभाणकस्तेषां 'हरेः कोलावतारेण किटीनां का वरेण्यता' इति।

भार्या—नाहमेवं ब्रवीमि, तेषां महत्ता शाश्वतसिद्धेति। पूर्वजानां महत्तां स्मरन्तोऽर्वाचीना अपिताननुकर्तुं प्रयतेरन्निति किल मे विचारः।

चर्चिलः—(विहस्य) कोऽस्त्यद्य भारते यः स्वपूर्वजानां महत्तामङ्गीकरोति। यतः—

पुरा मेकाले किल दूरदर्शी
प्रावेशयत् पाठ्यतयाऽऽङ्गलभाषाम्।
तस्य प्रयासश्च फलान्वितोऽभू-
दाङ्गलैकभक्तानसृजद्बहून् यः॥ १२॥

अत एव किल केचिद्भारतीया वदन्ति—

"षड्विंशत्याऽक्षरैर्गीर्णे चतुर्विंशतिवर्णके।
निगीर्णा भारतीयानां शक्तिराध्यात्मिकी च नः"॥ १३॥

सर्वथासौ दुर्बला जातिः, तद्देशपरित्यागेन चाऽस्माकमपि दुर्बलता सम्पाद्यते वामपक्षीयैः।

भार्या—भारतीयानामाङ्गलभाषासम्बन्ध एवान्तस्सुप्तं देशाभिमानमुद्बोध्य लाजपतिराय—तिलक-गान्धिनेहरुप्रभृतीन् सर्वदेशनायकानसृजदिति अन्ततोऽस्माकमेव अपकारकारी संवृत्तः। एवमेव किल विश्वसन्ति बहवो भारतीया अपि।

चर्चिलः—(विहस्य) आङ्गलराज्योन्मूलनेच्छुभिस्तैरेव आङ्गलभाषाराज्यं सुदृढं क्रियते भारते इति परमिदं मे प्रमोदस्थानम्। इयं ममेच्छा—

देशैक्यसाधनञ्चान्तर्देशसम्बन्धकारणम् ।
उच्चविद्यानिदानञ्चेत्यांग्लवाक् त्यज्यतां न तैः ॥ १४॥

भार्या—भवतु मा वा आङ्गलविद्याभ्यासोऽत्र कारणम् । बहवः किल सम्मानार्हा महापुरुषा दृश्यन्तेऽद्य भारते ।

कुर्वन्नैक्यमशेषभारतजने गान्धिर्महात्माभिधः
जानन्सर्वविदेशराज्यविषयान् नेहरूः सदोद्योगवान् ।
राधाकृष्णसुधीश्च रामनुमुखा विज्ञानशास्त्राध्वगा
नैकेऽन्येपि च सूचयन्ति भरतानद्यापि कर्मद्रुमान् ॥१५॥

चर्चिलः—एषां गुणवत्तायां न ममापि विप्रतिपत्तिः । अङ्गुलीपरिगणनीया एते कियद्वा बहुधा विभिन्नं भारतदेशं सुसंहतं कर्तुं शक्ष्यन्तीति अयमेव मेऽद्यैकैव आशाहेतुः ।

भार्या—परन्तु नेदंप्रथमतया उद्भूता एते भेदा भारते । यदा प्रतिमनुजं भिद्यते मनोवृत्तिः किं वात्र विस्मयकारणं सुविशाले देशे वर्तन्ते विभेदा इति ? एतांश्चान्तरङ्गिकभेदानतिक्रम्य नैकानि साम्राज्यानि पूर्वमप्यस्थापयन् भारतीया दूरदेशेषु । तद्विनाशः पुनः कालगति परिणाम एव । न खलु तावता कस्यचिद्देशस्योन्नतिरवनतिर्वा शक्यते निर्णेतुम् । कति वा रोमन-ग्रीकसाम्राज्यानि स्मृतिमात्रशेषतां न प्राप्नुवन् अस्मत्प्रान्तेऽपि ? अयञ्च विशेषः, नष्टेऽपि भारतसाम्राज्ये तद्देशीया संस्कृतिः पुनस्तैरेव संरक्ष्यते अद्यापि ।

चर्चिलः—(विहस्य) किमिदम्, भारतीयपक्षे उत्कोचमिव गृहीत्वाऽद्य भाष्यते त्वया ?

भार्या—सत्यनिर्णयावसरे पक्षपातं विना प्रवर्तितव्यमिति भवतैव किल नैकशो बोधितम् । अपि च अद्य न चेत्कतिपयवर्षानन्तरमपि वा दातव्यमेव तेभ्यः स्वराज्यम् । एवं स्थिते अद्यैव तस्य दाने च अस्माकं सौजन्येन सन्तुष्टा भारतीयाः पूर्वद्वेषं विस्मृत्य मित्रतां प्रदर्शयेयुः ।

चर्चिलः—(सवैलक्ष्यस्मितम्) अकिञ्चित्करेयमेतैरसारैरस्माकं मैत्री शत्रुता वा । अपि च कथं जानासि कतिपयवर्षानन्तरमपि वा दातव्यमेवेति ।

भार्या—ननु तीव्ररूपेण तत्र प्रचलन् असहायोद्यमः 'त्यजत भारतम्' इत्युद्यमश्चैवात्र प्रमाणम्।

चर्चिल:—नैव तावता दातव्यं भवेत्।

भार्या—कथं भवान् निरूपयिष्यति ?

चर्चिलः—(सवितर्कम्) अद्यैव दीयमाने स्वराज्ये कथं वा निरूपयितुं शक्यते। (विचार्य, सशिरः कम्पम्) आम्, एवमिदम्। यदि फ्रांस-पोर्तगाल-प्रभृतयोऽपि तत्तद्भागान् दास्यन्ति तदा तवाशयमङ्गीकरिष्यामः।

भार्या—तादृशाः खलु भागा अतीवाल्पप्रमाणाः। अतश्च तदधिगमार्थं न ते तावन्तं यत्नं कुर्युः, यावन्तमाङ्गलक्रान्तदेशाधिगमाय। अतश्च नेदं निर्णायकम्।

चर्चिलः—भवतु, पश्यामस्तावत् किं वा भविष्यति इति विश्रम्यताम्। चिन्तयिष्यामि यद्यत्र किञ्चित् कर्तुं शक्येतेति ('देशच्छेदकृते' इति पठन् निष्क्रामति, भार्या अनुगच्छति)।

इति चतुर्थोऽङ्कः

——

पञ्चमोऽङ्कः

(ततः प्रविशति जॉनः नातिसुन्दर्यौ च मध्यमवयस्के श्राङ्गलयुवत्यौ)

जॉनः—तस्यां रात्रौ यथोक्तं सम्यगनुष्ठितं युवाभ्याम्। मदिरामत्तचित्तौ हि तौ युवाभ्यामेवातिलोकसुन्दर्यौ राजप्रतिनिधेश्च भागिनेय्याविति विश्वसन्तौ सर्वथापि वां परिणेतुमिच्छतः।

उभे—कोऽत्र नौ विशेषः ? भवानेव नौ गुरुः। गुरुगाम्येव च खलु सर्वोऽपि गुणो दोषो वा शिष्यजनस्य।

जॉनः—अद्यापि युवाभ्यां तथा प्रवर्तितव्यं यथा सत्यलेशोऽपि ताभ्यां न ज्ञायते। प्रत्येकशश्च लक्षद्वयमानयिष्यतस्तौ। तच्च स्वीकृत्य विवाहप्रतीक्षाऽक्षमता सम्यक्प्रदर्शनीया।

उभे—किमिदमप्युपदेष्टव्यम् ?

जॉनः—आसन्नः समयः, दीपनिर्वापणसमनन्तरमेव तौ तमपवरकं प्रवेक्ष्यतः। युवाभ्यामपि शीघ्रमेव गन्तव्यम्। अहमप्यत्रैव वर्तिकादीपच्छायान्तरितः मित्रेण सह प्रतीक्षे वाम्।

उभे—तथा (इति निष्क्रान्ते)

[ततः प्रविशति ड्रिंकवाटरः]

ड्रिंकवाटरः—सखे ! निर्वापितो दीपः। तौ च अपवरकं प्रविष्टौ। ते च अनुपदमेवाऽऽगच्छतः। आगच्छ, आवामपि दूरतः पश्यावः तावदेतेषां प्रवृत्तिम्।

जॉनः—(सस्मितम्) तथा। (उभौ परिक्रामतः)

[ततः प्रविशति अपवरकस्थो रंगोजी अजीजश्च]

रंगोजी—सखे ! अद्य ते संघनाख्यशालामेव नायाते। न जाने अत्राग-मिष्यतो वा न वेति।

अजीजः—मित्र ! कुतः संदेहः ? सर्वथापि विश्वसनीयवचनौ जॉनः ड्रिंकवाटरश्च । मान्यथा शङ्कित्वा ।

रंगोजी—सत्यमिदम् । कालान्तरात्त्वमं मन एव मामेवं त्वरयति । का शक्तिः जॉनस्यान्यस्य वा अस्मान् वञ्चयितुम् ?

[अर्धोपविष्टमात्रयोरेव तयोः युवत्यौ प्रविशतः]

उभौ—(ससम्भ्रममुत्थाय) अये ! आगते एव प्रिये ! स्वागत यथाचिन्तितोपस्थितयोः प्रेयस्योः (एकैकामुद्दिश्य) उपविश्यतामत्र अर्धासने ।

उभे—मास्तु । अत्रोपविशावः (इति पार्श्वस्थे पर्यङ्के उपवेष्टुमिच्छतः)

उभौ—अये ! किमिदम् । भारतनारीवत् युवामपि लज्जाशीले ।

उभे—उपवेद्यावः अनतिकालेन । नायं समुदाचारः परिणीतयोर्भर्त्रोः परोक्षे परपुरुषेण साकमेकासने उपवेष्टुम् ।

रंगोजी—(विहस्य) विचित्रोऽयं समुदाचारः । परपुरुषेण सह नाट्यमिलितं न दोषाय; एकासनोपवेशनं दोषायेति !

अजीजः—को वाऽत्र परपुरुषः ? अत्रैवोपवेष्टव्यम् । (उभौ उभेऽपि बलादुपवेशयतः)

रंगोजी—अथ कुतो वा नाऽऽयातेऽद्य नाट्यशालाम् ? शून्येव किलासीत् सा युवाभ्यां विहीना ।

एका—(किञ्चिद्विहस्य) भवद्भ्यामेकवारं कृतनाट्या का वान्येन सह नाट्यं कर्तुं समुत्सहेत ?

अजीज.—साधूक्तं साधु ।

रंगोजी—अहो विवाहात्पूर्वमेव पातिव्रत्यमवलम्बितं युवाभ्याम् ।

उभे—(सस्मितम्) भविष्यद्भारतनार्यौ किलाऽऽवाम् ? भारतीयनारीवदेव चाद्य वस्त्रादिकं धारणीयमिति चिन्तितमावाभ्याम् । परन्तु......

अजीजः—परन्तु ?

एका—जॉनेन उक्तम् आङ्गलवेष एव भवतोः प्रिय इति ।

रंगोजी—सम्यग् जानाति आवयो रुचिविशेषान् जॉनः ।

अजीजः—साधु कृतम्। भारतीयनारीवेषो हि स्थगयति सहजं शरीर-सौन्दर्यम्। आङ्गलरीतिः पुनः द्विगुणीकरोति। यतः—

औन्नत्यं कुचयोर्विवर्धयति सा कार्पासपात्रद्वयी
मध्ये ते तनुतस्तनुं तनुतरं पाष्ण्र्युन्नतोपानहौ।
दृश्या चापि शरीरकान्तिरतुला सूक्ष्मांशुकान्तात्परं
लोकेऽपूर्वतरः किलांग्लयुवतीवेषो युवाकर्षकः ॥१॥

(ते मन्दहासं कुरुतः)

रंगोजी—सत्यमुक्तं त्वया। इहापि आङ्गलेयानां सहजा कार्यकारिता सुविदितैव। यतः—

कचकुचादिकवर्णनतत्परास्तदधिकं स्थगयन्ति हि भारताः।
वदति चाङ्ग्लजनस्तदसभ्यमित्यतितरां प्रकटीकुरुते च तत् ॥

(सर्वे हसन्ति)

जॉनः—(विहस्य) यथापूर्वमांग्लेयगुणवर्णनमारब्धमनेन।

प्रथमा—आस्तां तावदिदं वर्णनम्। प्रियतम ! चिन्त्यतां तावत् प्रथमतः प्रस्तुतं कार्यम्।

रंगोजी—साधु स्मारितं त्वया। आनन्दपारवश्येन इदमपि विस्मृतं मया परिमितोऽस्माकं काल इति।

ड्रिंकवाटरः—(विहस्य) नूनं सत्यमिदं परिमितो युवयोः काल इति।

अजीजः—किं वा अत्र वक्तव्यम् ? मन्ये जॉनेन निवेदितमेव स्यात् कीदृशौ आवामिति।

द्वितीया - किं जॉनेन इति ? अस्मन्मातुलादप्यनेकशः श्रुतो युवयोर्वृत्तान्तः।

प्रथमा—तस्मादेव च दिवसादारभ्य भवतोः कृतं पदं हृदये।

रंगोजी—सम्यग् जानात्यावयो प्रभावं राजप्रतिनिधिः। ततश्च।

द्वितीया—ततो जॉनड्रिंकवाटरयोः साहाय्येन प्रथमं भवतो दर्शनभाग्यमुपलब्धम्। ततः परं भवद्भ्यामेव ज्ञायते कीदृशी आसीदावयोः समवस्थेति।

उभौ—(सहर्षम्) नूनं दृष्टान्तरज्ञावावां गुणपक्षपातिन्योर्युवयोर्लाभेन।

प्रथमा—परन्तु इदमेव विषादस्थानं यद् आवयोः प्रेम धनक्रय्यं मन्येते भवन्तौ।

अजीजः—(विचिन्त्य) किं वा कृतमस्माभिः ?

द्वितीया—किमर्थं वा तद्धनं प्रेरितम् ?

उभौ—किं तदधिकृत्योच्यते ? अहो ! किमिदमल्पं पारितोषिकमपि मूल्यमुच्यते ?

प्रथमा—किं तत्पारितोषिकतया प्रेषितम् ? हन्त ! निर्वृतमद्यावयोर्हृदयम्। यतः—

पारितोषिकदानं हि प्रेम्णश्चिह्नमनुत्तमम्।
तस्मादङ्गीकृतौ तस्य दोषो नेत्याङ्ग्लनिर्णयः ॥३॥

अजीजः—एवमिदम्। अत एव हेस्टिंग्सुप्रभृतयो नैके भवदीयाः पारितोषिकाङ्गीकारेण भारतराजेषु आत्मनः सहजां प्रीतिं व्यञ्जयन्तः श्रूयन्ते।

रंगोजी—अत्यल्पं किल तदस्माभिः प्रहितं पारितोषिकम्। गृह्यतामद्य प्रत्यक्षतो दीयमानम्।

(इति लक्षद्वयं ददाति प्रथमायै, अजीजः द्वितीयायै च ददाति;
उभे अपि अनिच्छां नाटयतः)

उभौ—अलं संशयेन। गृह्यताम्।

उभे—प्रेमचिह्नं खल्विदम्। कथं वा परिहरावः ? (इति गृह्णीतः)

अजीजः—अथ कदा वा विवाहः ?

उभे—यदा भवद्भ्यां रोचते।

रंगोजी—युवयोः पतिप्रतिबन्धः किलापनेयः ?

प्रथमा—अतिसुकरोऽयमस्माकम्। यत्किमप्यल्पं कारणं निमित्तीकृत्य कलहं कृत्वा विवाहबन्धः छेत्तुं शक्यते।

अजीजः—कदा वा करिष्यते इदम् ?

द्वितीया—यथाकथञ्चित् स्वदेशप्रतिनिवर्तने विघ्नमुत्पाद्य द्वित्रिसप्ताहेभ्यः पूर्वमेव भवतोर्भार्ये भविष्यावः।

अजीजः—अये ! तावान् विलम्बः कथं वा सोढव्यः ? मैवम् । आवामेव स्वयं राजप्रतिनिधिं गत्वा विवाहस्य निर्णयं कुर्वः । जानीतः किल युवामपि तथा सोऽस्माकं वचो नातिक्रमिष्यति ।

उभे—(सभयम्) मामैवम् । (इत्यर्धोक्ते विद्युद्दीपा ज्वलन्ति ते च धनेन बहिः प्रधाविते)

जॉनः—अहो मूढयोरुत्कण्ठा ! कदाचिदावयोर्वृत्तान्तः राजप्रतिनिधये निवेद्येत एताभ्याम् ।

ड्रिंकवाटरः— भवतु, गच्छ त्वम् । ताभ्यां निर्णीतं धनं दत्त्वा परिशिष्टमानय । अहमपि अनयोः संलापं श्रोष्यामि । पश्चात्कर्तव्यं चिन्तयिष्यावः ।

जॉनः—तथा (इति निष्क्रान्तः)

अजीजः—सखे किं विलम्बेन ? श्रेयांसि किल बहुविघ्नानि । श्वः प्रभात एव राजप्रतिनिधिं गत्वा तस्मै निवेदयावः स्वप्रेमवृत्तान्तम् । विदितास्मत्स्नेहमूल्यश्चायं नाऽन्यथा वदिष्यति ।

रंगोजी—युक्तमुक्तं त्वया । एहि गच्छावः । (इति निष्क्रान्तौ)

[ततः प्रविशति गृहीतधनः जॉनः]

ड्रिंकवाटरः—सखे अत्याहितमापतितम् ।

जॉनः—किं तत् ?

ड्रिंकवाटरः—तौ किल मूर्खौ श्वः प्रभात एव राजप्रतिनिधये निवेदयितुं गमिष्यतः । सर्वथाऽऽवयोश्चरितं ज्ञायेत राजप्रतिनिधिना ।

जॉनः—अहो प्रमादः, किं वात्र कर्तव्यम् ?

ड्रिंकवाटरः—किमन्यत् ? पलायनमेव अद्य रक्षोपायः ।

जॉनः –कुत्र वाद्य पलाय्यते ? (विचिन्त्य) भवतु, दृष्ट उपायः आत्मानं रक्षितुम् ।

ड्रिंकवाटरः—(सहर्षम्) कथ्यताम् ।

जॉनः—विदितमेव किल त्वया यथा राजप्रतिनिधिर्नातीव स्निह्यत्येतयोः, केवलं पूर्वरीत्यनुरोधेन सहत एतयोर्मूर्खताम् ।

ड्रिंकवाटरः—ततश्च ?

जॉनः—ततश्च यथाकथञ्चिदेतयोः निष्कासनं सुशकमेव। विशेषतश्चाद्य भारतीयानां स्वराज्यं दातव्यमिति किल निर्णीतप्रायमस्मदीयैः। एवञ्च निष्फल एवैतादृशै राजबन्धुवैरितःपरं स्नेहः।

ड्रिंकवाटरः—परन्तु, को वात्रोपायस्तौ निष्कासयितुम्?

जॉनः—अस्त्येकं श्वेतपत्रं प्रधानामात्यशीर्षकसहितं पुरा कदाचित् मया दैववशात् संगृहीतम्। तस्मिंश्चाहमेकं लेखं विलिख्य कथञ्चित्तयोर्हस्तं प्रापयिष्यामि, यां दृष्ट्वा तौ राजप्रतिनिधेः पुरस्ताद् उन्मत्ताविव चेष्टिष्येते। ततश्चासौ तावुभावपि निष्कासयिष्यति।

ड्रिंकवाटरः—सम्यगालोचितं त्वया। (विहस्य) तव लेखं विनापि राजप्रतिनिधिः आत्मनः भागिनेय्याविति श्रुत्वैव उन्मत्तावेताविति मंस्यते। भवतु, त्वर्यतां लेखलिखनाय। नातिचिरादेव स्वराज्यं दीयेतेति अनयोरपि ज्ञातं भवेत्। लेखस्तथा लेखनीयो यथा न अनयोः संशयो भवेत्।

जॉनः—अये! त्वमप्यविदितैतत्स्वभाव इव वदसि। स्वराज्यं नामासम्भाव्यमित्येव किलाऽनयोरद्यापि दृढो विश्वासः।

ड्रिंकवाटरः—किं वोपदेष्टव्यम् तव? यथोचितं कुरु।

जॉनः—आगम्यताम्। लेखं लिखिष्यावः।

(इति निष्क्रान्तौ)

द्वितीयं जवनिकान्तरम्

(ततः प्रविशतः लेखं पश्यन्तौ जॉनः ड्रिंकवाटरश्च)

ड्रिंकवाटरः मित्र! तृतीयप्रान्तपालस्यापि यत्किञ्चिन् नाम लिख्यताम्। नो चेत्तयोः कदाचित् शङ्का भवेत्।

जॉनः—मा भैषीः। कुतस्तावानपि विचारस्तयोर्मूढयोः? (इति वदन् लेखं पत्रबन्धे बध्नाति)

(नेपथ्ये)

सखे ! किं वा वक्ष्यतीति चिन्तयसि ।

उभौ—(आकर्ण्य) अये ! तावित एवागच्छतः । (निकुञ्जान्तर्हितौ तिष्ठतः)

[ततः प्रविशति अजीजः रंगोजी च]

अजीजः—सखे ! स किं वक्ष्यतीति चिन्तयसि ?

रंगोजी—किमत्र वक्तव्यस्य ? अनुपदमेवाङ्गीकरिष्यति । को वा शक्नोत्यस्माकं प्रार्थनां निराकर्तुम् ?

अजीजः—एवमिदम् । परन्तु केन वा प्रसङ्गेन उपस्थातव्योऽयमावाभ्याम् ?

रंगोजी—मित्रयोर्मित्रदर्शनार्थं गमननेव प्रसङ्गः । किं वासवसेनादिवद् अस्माभिरपि कृतपूर्वसमयैर्विनीतैर्गन्तव्यम् ?

(अत्रान्तरे जॉनः कुञ्जान्तरात् लेखां तयोरग्रतः पातयति)

अजीजः—भवतु सर्वकार्यनिपुणः खलु त्वम्, विशेषतश्चैतादृशेषु । का वा मे चिन्ता ?

रंगोजी—मा विशंक्य । आगम्यताम् । (अग्रतो दृष्ट्वा) अये कोऽपि पत्रबन्ध इव । (उच्चित्य स्थानाक्षराणि वाचयित्वा) अहो प्रमादः परिजनस्य ! राजप्रतिनिधेरपि लेखा रजसि लुठन्ति । भवतु, इदमेव तद्दर्शने उपायो भविष्यति ।

अजीजः—दृश्यतां कुत आगतोऽयं लेखः ।

रंगोजी—पत्रबन्धः खल्वयं, न युक्तमन्यस्य पत्रमुद्घाटयितुम् ।

अजीजः—अरे ! मूर्खाणामेते नियमा अन्येषां पत्रं न पठितव्यम्, अन्येषामासने नोपवेष्टव्यमित्यादयः । पठ्यतां स्वैरं, पुनर्बद्धं करिष्यामः ।

रंगोजी—तथा (इत्युद्घाट्य) अये ! प्रधानामात्येन राजप्रतिनिधये प्रेषितोऽयं लेखः । भवतु, पठामि ।

"भारतस्थाय राजप्रतिनिधये इदमावेद्यते प्रधानामात्येन । बहुशः श्रूयतेऽस्माभिः यद् भारतीयाः केचिन्नायकंमन्याः तदनुयायिन्यः काश्चिद् गड्डुलिकाः कोलाहलं कुर्वन्ति 'स्वराज्यं, स्वराज्यम' इति, तेषु तीव्रो दण्डः पातनीयः ।"

अजीजः—साधु साधु । पठ्यताम्, ततस्ततः ?

रंगोजी—(पठति) "बहोः कालादस्माकं साहाय्यं कुर्वतां केषाञ्चिद्राज्यपालानां विषये कृतज्ञता आविष्करणीया, भारतपालने तेषामप्यधिकारविशेषप्रदानेनेति निर्णीतमस्माभिः ।"

उभौ—(आनन्दं प्रकटयतः । रंगोजी पुनर्वाचयति)

"इतः परं वङ्गमद्रपुरीमुम्बईराष्ट्राणां भारतीया एव अध्यक्षा भविष्यन्ति, ते च राजप्रतिनिधिना समानप्रतिपत्तिकाः । प्रथमतश्चास्माकं मित्रवरौ रंगोजी महाराजः अजीजनवाबश्च क्रमाद् वङ्गराष्ट्र-मद्रपुरीराष्ट्रयोरध्यक्षौ भविष्यतः ।"

अजीजः—(सविषादम्) अये । अहं मद्रपुरीराष्ट्रस्याध्यक्षः कृतः, न पुनर्वङ्गराष्ट्रस्य ।

रंगोजी—(सोत्प्रासम्) वङ्गराष्ट्रपालनविषये किञ्चिद्बुद्धिवैशिष्ट्यमपेक्ष्यते । अत एवाऽहं कृतः ।

अजीजः—(सकोपम्) किमहं बुद्धिविहीनः ? मूर्ख ! त्वया तव हैन्दवस्वभाव एव प्रदर्शितः ।

जॉनः—(विहस्य) पश्य अधिकारनाममात्रेणैव कथं वैतौ कलहायेते इति ।

रंगोजी—(विहस्य) भवतु, भवतु, पठामि लेखम् । "शीघ्रमेव तौ तत्पदमलङ्कर्तुं सन्दिश्य देशपालने तयोरप्युपदेशमनुसरतु भवानितः परम्" इति ।

अजीजः—अहो ! सुदिनमावयोरद्य प्रिया राज्यलक्ष्मीश्च सममेव वृणुत आवाम् ।

रंगोजी—पश्यामः, कथं वा भविष्यन्त्येते वराकाः स्वराज्यं स्वराज्यमित्याक्रोशयन्तः ।

अजीजः—प्रथमं तावत् वासवसेनादीनां गर्वः चूर्णयितव्यः, यैर्वयम् आङ्गलेयदासा इत्यनेकशोऽधिक्षिप्ताः ।

रंगोजी—अद्य विवाहविषयोऽपि सुकरः संवृत्तः ।

अजीजः—एवमिदम् । अद्य सेति किं, तस्या माता, मातामह्यपि अस्माकं पादयोः पतिष्यतः ।

रंगोजी—(सहासम्) मम तु सैवास्तु तवैव भवतां तस्या माता मातामही च।

अजीजः—अये! वङ्गदेशाध्यक्ष इति गर्वितोऽसि नितराम्।

रंगोजी—भवतु, गच्छावः शीघ्रम्। (इति निष्क्रान्तौ)

तृतीयं जवनिकान्तरम्

[ततः प्रविशति रंगोजी, अजीजः राजप्रतिनिधेश्च प्रतीक्षकः]

रंगोजी—अये! अपि निवेदितमावयोरागमनं राजप्रतिनिधये?

प्रतीक्षकः—अथ किम्।

रंगोजी—किमाह अयम्?

प्रतीक्षकः अन्तः कैश्चित्सम्भाष्यते, किञ्चित्प्रतीक्षितव्यमिति।

अजीजः (रंगोजीं प्रति) किमिदं समानप्रतिपत्तिकेष्वप्येवं प्रवर्तते—अनात्मज्ञः!

रंगोजी—अस्त्यत्र हेतुः।

अजीजः—कोऽसौ?

रंगोजी—सामान्यैः समं महापुरुषा अपि एकदैव न द्रष्टव्या इति। अतिनिपुणः खल्वाङ्गलेया अधिकारतारतम्यानुसरणे।

अजीजः—युक्तमुक्तं त्वया।

प्रतीक्षकः—(घण्टां श्रुत्वा, अभ्यन्तरं गत्वा पुनः प्रविश्य) आगच्छतां भवन्तौ, राजप्रतिनिधिः प्रतीक्षते।

उभौ—गच्छाग्रतः। इमौ आगतौ स्वः। (साटोपं परिक्रामतः) (ततः प्रविशति राजप्रतिनिधिः, आत्मसहायः, दूरतश्च जॉनः ड्रिकवाटरश्च)

राजप्रतिनिधिः—(उभौ दूरतो विलोक्य, आत्मसहायं प्रति) किमिदम्, एतयोः प्रवृत्तिर्विकृततरेवाद्य दृश्यते।

आत्मसहायः—सहजा किलाऽनयोर्लोकाधिकंमन्यता। तत्रापि अद्य केनापि विशेषेण भवितव्यम्।

जॉनः—(जनान्तिकम्) सखे! पश्य, फलितोऽस्माकमुपायः। राजप्रतिनिधिमपश्यन्ताविवैतौ समुदाचारप्रणाममपि अकृत्वैव धृष्टमागच्छतः।

ड्रिंकवाटरः—(जनान्तिकम्) कथमन्यथाभावो भवता दृष्टस्योपायस्य ?

उभौ—भो राजप्रतिनिधे ! कथमसि त्वम् ?

आत्मसहायः—(जनान्तिकम्) अहो ! नूतनोऽयं त्वंकारः । अस्माकं भारत-राज्यपरित्याग एताभ्यां विदितो भवेत् ।

राजप्रतिनिधिः – सम्भाव्यमिदम् । (प्रकाशम्) यथापूर्वमेवाऽस्मि । अथ कोऽपि विशेषः ? उपविश्यताम् । (उभौ उपविशतः) ।

अजीजः—को विशेषः ? अस्माकमत्रागमनमेव विशेषः ।

राजप्रतिनिधिः —(सवैलक्ष्यस्मितम्) किमद्य मम दर्शनार्थमागमनं विशेषः ?

रंगोजी—नहि नहि; तवातिथिरूपेणागमनं विशेष इत्ययं ब्रवीति ।

आत्मसहायः—को विशेषः । बहुशः किलागतमत्र भवद्भ्याम् ।

अजीजः—नायं तव विशेषः । अस्माकं पुनरयं विशेष एव यतोऽद्य राज-प्रतिनिधेः भागिनेयीभ्यां परिचयभाग्यं लब्धमावाभ्याम् ।

राजप्रतिनिधिः—(सविस्मयम्) किमुक्तं, मम भागिनेय्याविति !

रंगोजी —आम्, तवैव भागिनेयीभ्यां परिचयः सम्प्रापित इति नितरां कृतज्ञा वयम् ।

राजप्रतिनिधिः—अये ! कोऽयं प्रलापः ? के मम भागिनेय्यौ, का वा मम भगिनी ?

(जॉनः ड्रिंकवाटरश्चान्तर्हसतः)

रंगोजी—(उच्चैर्विहस्य, स्वाविदितमेव पत्रबन्धं पुरः आसन्द्यां निक्षिपन्) ज्ञातो मया राजप्रतिनिधेराशयः । एतादृशा विषया बहूनां पुरः नाऽनुचिन्तनीया इति किल मन्यसे त्वम् ?

जॉनः—(आसन्दीस्थं पत्रबन्धं सूचयन्) यथा कथञ्चित्तथा कर्तव्यं यथा स लेखो राजप्रतिनिधेर्हस्ते न पतेत् ।

ड्रिंकवाटरः—मा भैषी. । अहं साधयिष्यामि ।

अजीजः—को वाऽत्र संदेहस्यावकाशः ? तवात्मसहाय आवयोरपि तादृश एव, आन्तरङ्गिकौ चात्र विषये जॉनः ड्रिंकवाटरश्च ।

आत्मसहायः—(जनान्तिकम्) आर्य श्रूयताम्, अहं तयोरपि किल किङ्करः !

राजप्रतिनिधिः—अये ! किमिदम्, उन्मत्ताभ्यामिव प्रलप्यते ?

अजीजः—(सकोपम्) अये ! किमुच्यते, उन्मत्ताविवे'ति ?

आत्मसहायः—किमुन्मत्ताविवेति ? उन्मत्तावेवैतौ । (सर्वे हसन्ति) (अत्रान्त ड्रिंकवाटरः किञ्चित्पानीयमानीय चतुर्णां मध्ये आसन्द्यां स्थापयति, तत्रस्थञ्च पत्रबन्धं गुप्तमपनयति) ।

अजीजः—(सकोपमुत्थाय) न युक्तमिदं राजप्रतिनिधे ! स्वीयैर्जनैरस्मानवमानयितुम् ।

राजप्रतिनिधिः—(विहस्य) अयं भवतोरपि किल स्वीय एव ?

रंगोजी—अये ! अयुक्तोऽयं ते समानप्रतिपत्तिकैरेवं व्यवहारः ।

अजीजः—सखे, न दृष्टं किल तत्पत्रमनेन । दर्शयैतदस्मै । क्षमां याचमानः पादयोः पतिष्यति ।

रंगोजी—(स्ववस्त्रेषु सर्वत्राप्यन्विष्य, लेखमपश्यन्) तवैव हस्ते दत्तो मया; पश्य ।

राजप्रतिनिधिः—अहो उन्मादस्य परा काष्ठा ! एतादृशानां मूर्खाणां साहचर्येणैव वयमपि अपयशोभागिनः संवृत्ताः ।

अजीजः—(आत्मवसनेष्वन्विष्य) अये ! मम न दत्तः; त्वयैव किल गृहीतः।

राजप्रतिनिधिः—भवतु, कथ्यताम्, को वा लेखः ?

रंगोजी—स एव प्रधानसचिवस्य लेखो येन आवां मद्रपुरीवङ्गप्रान्तयोः राज्यपालौ कृतौ ।

राजप्रतिनिधिः—(साश्चर्य-परिहासम्) किं प्रधानसचिवस्य लेख ? (सर्वे हसन्ति) (जॉनः ड्रिंकवाटरश्च हासम् अन्तर्नियच्छन्तौ अन्तर्गच्छतः) (आत्मसहायं दृष्ट्वा) शीघ्रमेव प्रवेश्येतामेतौ उन्मादचिकित्सालयम् ।

उभौ—भवतु, भवतु । अचिरेणैव कालेन पश्चात्तापतप्तो भविष्यसि ।

(नेपथ्ये)

विजयतां नेहरुः, विजयतां महात्मा गान्धिः (इत्यादिकलकलः)

राजप्रतिनिधिः—कः कोऽत्र भो ! दृश्यतां कुतोऽयं कोलाहल इति ।

प्रतीहारकः—(प्रविश्य) आर्य ! अचिरादेव कारागारविमुक्ताः महात्मागान्धि' जवाहरलालनेहरुः अन्ये च देशनायकाः स्वागतेन सत्क्रियन्ते प्रजाभिः ।

राजप्रतिनिधिः—आम्, ज्ञातम् । मयापि गन्तव्यं भविष्यद्भारतप्रधानामात्यस्य जवाहरलालनेहरोः अन्येषाञ्च च देशनेतॄणां दर्शनाय । इत्यात्मसहायेनानुगच्छति)

अजीजः (प्रतीहारकं प्रति)—किमिदं तेषां दर्शनार्थमयमेव गच्छति ?

प्रतीहारकः—किं न जानीतो भवन्तौ अचिरेणैव भारतदेशः स्वातन्त्र्यं लप्स्यते इति ?

अजीजः—(साश्चर्यम्) किमुच्यते ? किमुच्यते भारतदेशस्य स्वातन्त्र्यमिति ?

प्रतीहारकः-किमत्राश्चर्यम् ? चिरात्किल प्रवर्ततेऽत्र सन्नाहः ।

अजीजः—सखे ! किमयं स्वप्नः ?

रंगोजी—अहो सर्वथा वञ्चितावावामेतैराङ्गलापसदैः ।

अजीजः—(सविषादम्) ते युवत्यौ, स लेखः, किं सर्वमपीदं वञ्चनैव ?

रंगोजी—कोऽत्र संदेहः । (सविमर्शम्) अत एवानेन राजप्रतिनिधिना एवं प्रवृत्तमद्य ।

अजीजः—(सपरिहासम्) अये ! त्वं न जानासि आङ्गलानां स्वभावम् !

रंगोजी—मूर्ख ! किमयमपि परिहासस्यावसरः ?

अजीजः—(सविषादम्) सत्यमिदम् । अये, अन्तेऽपि लक्षत्रयं लुठितं ताभ्याम् ।

रंगोजी—किं लक्षत्रयमिति, सर्वमेव लुठितम् । स्वराज्यं किल लभ्यते भारतीयैः ।

अजीजः—अहो ! सत्यमिदम् । प्रकृत्यैव राज्यपालविद्वेषिणः प्रजानायकंमन्याः नेहरुपटेलप्रभृतयो नूनमस्माकं राज्यान्याक्रमिष्यन्ति । को वात्रोपायः ?

रंगोजी—एतदेव मयापि विचिन्त्यते । एतावुत्पीडितानां प्रजानां साहाय्यमपि शशविषाणप्रायमेवाऽस्माकम् । किं वाद्य कर्तव्यम् ?

अजीजः—भारतीयानां स्वातन्त्र्यं नाम अस्माकं पारतन्त्र्यमेव। न कदापि मया विश्वसितं एवं भविष्यतीति। का गतिः।

रंगोजी—किमन्यत्? अस्माभिः तथा कर्तव्यं यथा कथञ्चिल्लब्धमपीदं स्वराज्यं न सुरक्षं भवेत्। अत्र च एक एवोपायः।

अजीजः—उच्यताम्।

रंगोजी—स्वराज्यस्यास्य लाभे तदैकमत्यं हि कारणम्।
तस्मिन् भग्ने च सहसा स्वराज्यं नश्यति स्वयम्॥ ४॥

अजीजः—ननूक्तमेव किलाऽनेकशो मया, बुद्धया बृहस्पतिस्त्वम्' इति। तत्राप्युपायश्चिन्त्यताम्।

रंगोजी—किमत्र चिन्तितव्यम्? अस्त्येव किलासौ। पश्य—

यत्र स्यान्मतभिन्नता मतकृतो द्वेषोऽत्र संवर्ध्यता-
मैक्यं यत्र मतस्य तत्र बहुधा वर्णादिजो विग्रहः।
भाषाप्रान्तकृतश्च तत्र कलहो नो यत्र वर्णादिजः
सर्वत्रास्तु च पक्षजः, कथमिदं स्याद्राज्यमीहामहे॥ ५॥

अजीजः—(सहर्षं विहस्य) अहो। दृश्यताम्, अनुपयुक्ततया निराकृतमपि वस्तु कथं वा कालान्तरे उपयुज्यत इति।

यतः—

न ते हिन्दुमते श्रद्धा नेस्लाम् धर्मे ममादरः।
पश्यात्मकार्यसिद्धयर्थमद्यैते साधनीकृते॥ ६॥

रंगोजी—यथासमयं सर्वमप्युपयोक्तव्यम्। इयमेव हि राजनीतिर्नाम। आगम्यताम्, गच्छावः कार्यसिद्धयै।

(निष्क्रान्ताः सर्वे)

इति पञ्चमोऽङ्कः

——

षष्ठोऽङ्कः

[ततः प्रविशति मार्गश्रान्तः सकुटुम्बः पान्थः]

पान्थः—(किञ्चिद्गृहमुपसृत्य) अयमहं भोः, दूराध्वपरिश्रान्तः सकुटुम्बः कान्दिशीकः। अनुगृह्णातु यः कश्चिद्दयालुः आश्रयदानेन।

गृहस्थः—(बहिरागत्य) अये! अध्वपरिश्रान्ता अतिथयः। (सादरम्) आर्य श्रान्ताः स्थः सर्वे नितराम्। आगम्यताम्, गृह्यतां यथाशक्ति क्रियमाणोऽस्माकम् अतिथिसत्कारः।

पान्थः—(सहर्षम्, निःश्वस्य) अहो! कियन्ति वर्षाणि व्यतीतानि एतादृशान्यमृतरसस्यन्दीनि वचनानि श्रुतवतामस्माकम्।

(सर्वे अन्तःप्रविशन्ति)

गृहस्थः—आर्य किमिदमप्याश्चर्यस्थानम्। अतिथिदेवाः खलु भारतीयाः।

गेहे स्वे विचरन्यथा गृहपतिः सर्वत्र पश्येत् स्वतां
एवं क्षेत्रगणान् दिशासु सकलास्वासेतुशीताचलम्।
यात्रार्थं विचरन्ति येऽखिलजने पश्यन्ति ते स्वीयतां
हेतुः सातिथिदैवताऽत्र भरतेष्वेकत्वधीकारिणी ॥१॥

पान्थः—(विचिन्त्य) स्वस्थानान्निष्कासिता वयमनयैवाशयाऽत्रागताः। परन्तु यत्र तत्र गम्यते स्म तत्र अर्धचन्द्र एव लब्धोऽस्माभिः। यतो निर्धनाः किल निर्धना एव। कथं वा ते साहाय्यं कर्तुं शक्नुवन्ति। धनिनः पुनः—

वित्तं व्ययन्ति बहुधाखिलभोगसिद्ध्यै
तृप्यन्ति नैव, गणयन्ति च सद्व्ययं तम्।
दीयेत याचकजनाय च पैसमात्रं
शोचन्ति तद् व्यथितमेव वृथेति सर्वे ॥२॥

गृहस्थः—साधारणोऽयं दोषः स्वार्थपरता नाम सर्वदेशीयानाम्। तन्निवारणायैव चानिशं प्रयत्यते अस्मत्प्रधानामात्येन नेहरुणा अन्यैश्च देशनायकैः।

अपि च कति वा न सन्त्यद्याप्यस्माकं देशे ये परार्थमेव स्वार्थं मन्यमाना अनुभवन्ति तत एव महान्तमानन्दम् । यतः—

भुंक्तां नैकनिरन्तभोगविभवान् प्राप्नोतु चोच्चैः पदं
नित्यं पुत्रकलत्रबान्धवसुखञ्चाश्नातु लोके जनः ।
साह्यं प्राप्य कृतज्ञतातिशयितो हृष्टस्य दृष्ट्वा मुखं
मोदो यः किल लभ्यते स सुलभः किं वान्यतः कुत्रचित् ॥३॥

पान्थः—ननु भवादृशा एवात्रोदाहरणम् ।

गृहस्थः—आस्तां यावदयमर्थवादः । अथ निष्कासिता इत्युक्तम्; को वा भवतां देशः ? कुतो वा निष्कासिताः ?

पान्थः—(निःश्वस्य) पाकिस्तानदेशादागच्छामो वयं मादृशाश्चानेके । महम्मदीयभिन्नत्वमेवाऽस्माकं निष्कासनहेतुः ।

गृहस्थः—अहो ! देशविभागाच्चतुर्दशवर्षसमनन्तरमपि इयमवस्था तत्रत्यानां महम्मदीयेतराणाम् ।

पान्थः—किं वाऽसम्भावनीयं तस्मिन्देशे यद्राज्यस्य इस्लामराज्यमित्येव नाम ।

गृहस्थः—

आमुष्मिकार्थचिन्तायै मतानां किल सम्भवः ।
कथमैहिकराज्येषु मतभेदस्य पालनम् ॥४॥

अत एवाऽस्मत्प्रभवः भारते सर्वेषां मतानां सममेव प्राधान्यं दिशन्ति । न चात्रास्ति वैयक्तिकानां भेदानां राजकार्येष्वनुप्रवेशः ।

पान्थः—अत एव किल सुखिनः सर्वेऽपि यूयम् ।

गृहस्थः—कोऽत्र सन्देहः ? महती किल समृद्धिः सम्पादिता अस्मद्देशीयैरेषु चतुर्दशवर्षेषु । पश्यतु भवान्

कृताधिका भूमिरदेवमातृका वाणिज्ययन्त्रादि कृतं समृद्धम् ।
विस्तारिता कीर्तिरशेषदेशेष्वानन्दभूमिर्भरतावनिर्नः ॥५॥

पान्थः—किं वास्य देशस्याऽसुलभं नाम यत्र विश्वविख्याता जवाहरलालप्रभृतयः कर्णधाराः ।

गृहस्थः—सत्यमिदम् । परन्तु प्रायो भवान् न जानाति कियान्वा श्रमोऽनुभूतोऽनुभूयते चाऽस्माकं नायकैः ईदृगुन्नतिलाभाय । पश्यतु,

हिन्दूमुस्लिमभेदभञ्जनविधौ त्यक्ता तनुर्गान्धिना
यातोऽनेकविभिन्नराज्यकलहानुन्मूल्य तान् वल्लभः ।
भाषाप्रान्तविभेदजांश्च कलहान्निर्वापयन्तो भृशं
नेतारोऽद्य हि नेहरुराष्ट्रप्रमुखाः क्लिश्यन्ति रात्रिन्दिवम् ।

पान्थः—पश्यामि, कथं वा न्यथा एतादृशी वृद्धिर्लब्धुं शक्या अचिरेणैव ? यतः—

नरस्यैकस्य वृद्धिः स्यान्नैकवर्षपरिश्रमात् ।
ईदृशस्य विशालस्य पुनर्देशस्य का कथा ॥७॥

गृहस्थः—परन्तु, एकमेवाऽस्माकं विषादस्थानं यत् भारताङ्गस्य कोङ्कणानां नैवैतावत् भारते अनुप्रवेशः कृत इति ।

पान्थः—कियदेतत् भारतीयानाम् ? एषां शान्तिप्रियतैव किलात्र विलम्बे हेतुः ।

गृहस्थः—भवतु, स्नानादिकमाचरन्तु भवन्तः, आहारेण सन्नद्धेन भवितव्यम् ।

पान्थः—अहो ! अविस्मरणीयं खलु भवदीयमातिथ्यम् । न जानीमः कुत्र वेतः परमेतादृशमादरं लभेमहीति ।

गृहस्थः—मा विषीदतु भवान् । प्रथमतो भवादृशानां साहाय्यं कर्तव्यमिति कृतनिश्चयोऽस्माकं प्रधानामात्यः । श्रूयते दण्डकारण्यमिति स्थाने अन्यत्र च भवादृशानामावासाः कल्प्यन्ते ।

पान्थः—शोभनः खल्वयं दिवसः यत्रैतादृशी वार्ता श्रूयते ।

गृहस्थः—इतः स्नानागारम्, आगम्यताम् ।

(सर्वे गच्छन्ति)

इति विष्कम्भकः

[ततः प्रविशति प्रधानामात्यो नेहरुः, कांग्रेसाध्यक्षः सञ्जीवरेड्डिः, गृह-निर्माणादिमन्त्री गोपालरेड्डिश्च]

नेहरुः—मित्र गोपालरेड्डे, पाकिस्तानदेशाद् अविरतमागच्छद्भ्यः शरणार्थिभ्यस्तावत् प्रथमं दण्डकारण्यप्रान्ते गृहनिर्माणोद्योगः कर्तव्यः।

गो० रे०—आर्य एवमिदम्, यथानिश्चितं तस्यैव प्राथम्यं दीयते।

नेहरुः—सञ्जीवरेड्डे, महान् मे प्रमोदः यद्भवानस्माकं कांग्रेसपक्षं सुसंघटितं कर्तुमनवरतं महान्तं यत्नं करोति।

सं० रे०—को वात्र मे विशेषः? सङ्क्रान्तसूर्यप्रकाश एव हि चन्द्रमाः शक्नोति अन्धतमसमपाकर्तुम्।

गो० रे०—को वा न जानाति अद्यत्वे कांग्रेसपक्षस्य सर्वापि प्राणशक्तिः प्रधानामात्य एव निविष्टेति।

नेहरुः—परन्तु, इदमेव विषादस्थानं यन्महानागरिकमानिनोऽपि देशा अद्यापि वर्षसहस्रात्पूर्वमिव मनोवृत्तिं प्रकटयन्तीति। यतः—

रोदोऽन्तरे केचिदिह भ्रमन्ति केचिद्धियासन्ति च चन्द्रलोकम्।
अथापि मे देश इतीव भेदं बुद्धेर्जिहासन्ति न केऽपि देशाः॥८॥

ततोऽपि च नितरां शोचनीया अस्मदीयानां मनोवृत्तिः। यतः—

मत्प्रान्तो मद्भाषा मे वेषो मे कुलञ्च मे पक्षः।
इति सङ्कुचितधियोऽमी विस्मृतदेशा मिथो द्विषन्त्यत्र॥९॥

सं० रे०—आर्य, सर्वदापि सर्वमेव जगदग्रतः कृत्वा चिन्तयतो भवतः एतादृश्यो भेदबुद्धयः अत्यधिकदोषतया प्रतिभासन्ते। मन्ये, एतावन्त इतोऽपि वा अधिका भेदाः सर्वेष्वपि देशेषु वर्त्तन्त एवेति।

नेहरुः—कुतो वा इयत्यपि सङ्कुचितबुद्धिः कर्तव्येत्येव मे प्रश्नः। देशक्षेमे हि व्यक्तीनां क्षेमः सम्भवति। एवं स्थिते 'लोकाः समस्ताः सुखिनो भवन्तु' इति किल चिन्तनीयं सर्वैः।

सं० रे०—युक्तमुक्तं तत्रभवता। बहुशोऽद्यत्वे श्रूयते परिपालनासौलभ्यार्थं

कृतेषु भाषाप्रान्तेषु भाषा अपि किलाऽधिकृत्य विवादः प्रवर्तते। अस्मत्पक्षीया अपि केचिदत्र कारणं भवन्ति इति।

नेहरुः—इदमन्यदुदाहरणं यथा साध्यं विस्मृत्य साधनविषये कलहायन्ते जनाः। अथवा, क्रमेण चैतादृशानां विवादानां निष्फलतां पश्यन्तोऽस्मद्देश्याः स्वयमेव स्वार्थपरान् बोधान् परिहरिष्यन्तीति मे विश्वासः।

गो॰ रे॰—कोऽत्र संदेहः ? नैव हि कदाचिदपि व्यर्था भविता भवादृशानां नेतृता।

नेहरुः—(विहस्य) किमहमेक एव सर्वं करोमि ? ननु भवादृशानामपि सर्वेषामविच्छिन्ना कार्यदीक्षाऽत्र कारणं यत् इयत्यपि वा समृद्धिः साधिता अस्माकं देशे ? अथ मिलितो रक्षणमन्त्री ?

गो॰ रे॰—अथ किम्। तत एव नाटकवृत्तान्तं स्मारयितुमत्रागतोऽस्मि।

नेहरुः—अपि कोंकणविषये यथासमीहितं कृतमनेन ?

गो॰ रे॰—अथ किम्। अनेन च समयेन कोंकणान् प्रविष्टैरेवास्मत-सैन्यैर्भवितव्यम्।

नेहरुः—हन्त ! अनिच्छतापि मया दण्डोपाय उपयोक्तव्य आसीत्। (दूरभाषो नदति, श्रवणमभिनीय) (संजीवरेड्डिं प्रति) तत्रभवानुपराष्ट्रपती राधाकृष्णोऽपि ममाह्वानमुररीकृत्याऽद्य नाटिकां द्रष्टुमत्राऽऽयाति। आगच्छतु तत्रभवान्। कञ्चिदपि वा कालं रूपकदर्शनेन मनोविश्रान्तिं लभेमहि।

सं॰ रे॰—अनिशं नैककार्यचिन्ताव्यग्रमानसानां भवादृशामत्यावश्यकी एतादृशी विनोदविश्रान्तिः।

नेहरुः—परन्तु, प्रायः शरीरमात्रेणैव किल सन्निधीयते मया एतादृशेषु समयेषु।

गो॰ रे॰—ममाऽयं विश्वासः यद्भवानद्य सम्यक् मोदिष्यते अस्य रूपकस्य दर्शनेनेति। नन्वेतदर्थमेव मयाऽद्यैतस्य प्रयोग आदिष्टः।

नेहरुः—भवतु, द्रक्ष्यामस्तावत् (यत्किञ्चिच्चिन्तयन्नुपविशति)

(ततः प्रविशति राधाकृष्णः, सर्वे अभ्युत्तिष्ठन्ति)

नेहरुः—इत उपविशतु भवान् ।

राधाकृष्णः—(उपविश्य, सवितर्कं दृष्ट्वा) किञ्चित्कार्यव्यग्र इव दृश्यते भवान् !

नेहरुः—युक्तं दृष्टं भवता । मन्ये राज्यनिर्वहणप्रवृत्तानां सर्वदाप्युद्वेगहेतव एव लभ्यन्त इति । यतः—

चीनापोर्तगलादिदौष्ट्यमथ सा काश्मीरदेशव्यथा
देशे प्रान्तमतादिजश्च सुमहान्कोलाहलोऽनर्थदः ।
पौरोभाग्यमिदं विपक्षजनतादृश्यं मनः क्लेशय-
न्त्यानन्दोऽपि महान्भवत्यनुपदं चालोक्य देशोन्नतिम् ॥ १० ॥

राधाकृष्णः—सुष्ठूक्तं भवता । अतएव किल वर्णितं कालिदासेन—

'नातिश्रमापनयनाय न च श्रमाय
राज्यं स्वहस्तधृतदण्डमिवातपत्रम्'इति ॥

भवतु, सुलभप्रतीकारा एवैते सर्वेऽप्यनर्था भवादृशानां कार्यदीक्षितानाम् । याप्ययं विपक्षीयाणां पुरोभागिता नैव साप्युद्वेगकारणम् । यतः—

अकाव्यग्रन्थको विद्वानप्राप्ताधिकृतिः पुमान् ।
अन्यान्विमृशतस्तीव्रं नोद्विजेतात्र बुद्धिमान् ॥११॥

नेहरुः—नैवाहमुद्विजे निन्दायाः । निन्दा निन्दार्थमेवेतीयं प्रवृत्तिस्तु मे न रोचते । अथवा, निन्दन्तु वा स्तुवन्तु वा, अस्मदीयाः सर्वेऽप्यस्मदीया एव । न ममात्र कोऽप्याग्रहः । इदमेवाश्चर्यकारणं यत्पूर्वेद्युः मैत्रीमुद्घोषयन्तः चीनीया अद्य शत्रवः संवृत्ताः, महान् किल मित्रद्रोहोऽयम् !

राधाकृष्णः—कोऽत्र संदेहः ? सर्वथापि ननु दुस्सहा इयं प्रवृत्तिः शान्तिप्रियाणामस्माकं भारतीयानाम्, विशेषतश्च भवतः । यो हि—

सर्वेयं प्रकृतिर्मयाद्य विजितेत्येवं नरः कत्थतां
यावन्मानसमेष नो विजयते शान्तिः कुतोऽकुण्ठता ।

ज्ञात्वैवं जवहर्महाशय ! जगत्संग्रामघोरापदः

रक्षिष्यन्नतनोः सुधीबहुमतं [1]तत्पञ्चशीलं नु तम् ।। १२ ।।

गो० रे०—सर्वथा ममाऽयं विश्वासः—

आत्मोन्नत्यै यथा बुद्धस्याष्टमार्गमिदं तथा ।

पञ्चशीलञ्च भवतः विश्वरक्षैककारणम् ।। १३ ।।

मिथः सीमान्ताधिकारसम्माननम्, अन्योन्यानाक्रमणम्, मिथोऽन्तर्देशीयविषयेष्वननुप्रवेशः, परस्परलाभदायिनी समताबुद्धिः शान्त्यार्थिकमिथस्साहाय्येन च सहवसतिश्चेत्यहो सर्वकालेष्वनन्तशान्तिसधानदक्षं किल भवदुपज्ञं पञ्चशीलम् ।

सं० रे०—सत्यमाह भवान् । इदं हि पञ्चशीलम्—

कुटुम्बेऽल्पेऽथवा ग्रामे पुरे देशे जगत्यहो ।

सर्वत्रानुसृतं शान्तिसंधानकुशलं भवेत् ।। १४ ।।

नेहरुः—(विहस्य) का वा अत्र मदुपज्ञता नाम । भारतीयसंस्कृतेः किलेदं मूलभूतम् ।

प्रतीक्षकः—(प्रविश्य) आर्य ! सज्जं सर्वमपि । तत्र भवतामाज्ञामात्रविलम्ब एव रूपकप्रयोगारम्भः ।

नेहरुः—वयमपि तद्दर्शनोत्सुकाः । मित्र, गोपालरेड्डे, अलंक्रियतामग्रं स्थानं भवता । भवद्भिर्नेया वयमेतादृशविषयेषु । यतः—

कान्ते शान्तिनिकेतने बहुतिथं नीत्वा पुरानेहसं

दान्ताद्विश्वकवे रवेः सुललिता विद्या समासाद्य यः ।

नैकात्युत्तमकाव्यनिर्मितिचणश्चासि स्वयं सत्कविः

को वा स्याद्वद भावुकस्त्वदपरः काव्यामृते लोलुपः ।। १५ ।।

गो० रे०—सर्वसमास्वादनीया किल साहितीसम्पत् । को वात्र मे विशेषः ?

1. Literally 'five tenets'. These are (1) non-agression, (2) non-interference, (3) recognition of each others sovereignty, (4) mutual help and (5) peaceful co-existence.

'J. Nehru' P. 355

यैकानेकविभिन्नमानवहृदां संवादभूमिर्यया
संक्षिप्ताविव चैकतोऽन्तरहितौ तौ देशकालौ क्षणात् ।
ज्ञेयज्ञादिभिदालयाद्यदुदिता मुन्निर्विकल्पा मता
सा साहित्यकलाऽमलाऽजडमतिं कं नो धिनोत्युच्यताम् ॥१६॥

नेहरुः—उक्तं किल भवतैव 'अजडमतिमि'ति । ननु चात्यल्पीयसी एतादृशां संख्या लोके । भवतु, भवतु (प्रतीक्षकमुद्दिश्य) उपक्रम्यतां रूपकप्रयोगः ।

(जवनिकापनये)

—गर्भाङ्कः—

नान्दी— यस्याः परिणतेर्भेदो जगदेतच्चराचरम् ।
मानसे नः सन्निधत्तां वाक् परा सानपायिनी ॥ १७ ॥

सूत्रधारः—(नान्द्यन्ते प्रविश्य) आज्ञप्तोऽस्मि त्रयोदशगणतन्त्रोत्सवप्रसङ्गेन भारतराजधान्यां देहल्यां सन्निहितैरार्यमिश्रैः यथा मानवश्रेयःसम्बद्धया केनचन रूपकेणोपस्थातव्यमिति । अथ किं वाऽद्य रूपकं प्रयोगयोग्यं भवेत् ? (विमृशति)

(नेपथ्ये) विजयतां तत्र भगवानशोकसार्वभौमः ।

सूत्रधारः—(श्रुत्वा) अये ! अशेषदिगन्तविश्रान्तयशाः भारताधीशचूडामणिस्तत्रभवान् देवानां प्रियः, अशोकसार्वभौम इत एवागच्छति । न युक्तं सार्वभौमस्य मार्गे स्थातुम् ।

(इति निष्क्रान्तः)

[ततः प्रविशति राजगुरुणा सद्वितीयः अशोकसार्वभौमोः दूरतश्चामात्यः]

अमात्यः (अशोकमुपसृत्य) विजयतां महाराजः ।

अशोकः—अमात्यवर ! किमित्यकाले उपस्थितं भवता ? मन्ये न किमप्यत्याहितमिति ।

अमात्यः —महाराज !

सत्याहिंसादिधर्माणामुपदेशेन धारिणीम् ।
त्वयि शासति का वाऽत्र शङ्कापि स्यादपायतः ॥१८॥

अशोकः—(स्मित्वा) अर्थवादः किलायम् । उच्यतां वृत्तार्थः । यतः—

नोपदेशेन साधुत्वं सुकरं निखिले जने ।
तथापि क्रियते यत्नः केषुचिद्वा भवेदिति ॥१९॥

अमात्यः— महाराज ! अस्मत्सामन्तः किल कालिङ्गः स्वप्रजा बहुधा पीडयन् काले काले सीमान्तेष्वस्मत्प्रजा अपि नैककष्टभाजः करोति ।

अशोकः—कोऽयं विभेदः तत्प्रजा अस्मत्प्रजाश्चेति । पश्य—

आसेतोरातुषाराद्रेराचीनात्पारसीकतः ।
एको हि निखिलो देशो विभागाः पालनाकृते ॥२०॥

अमात्यः—एवमिदम । इदमेव विचार्य नैकशो मया सन्दिष्टं कलिङ्गाय नैतादृशं प्रजापीडनं न्याय्यमिति । अन्ते च पञ्चषदिनात्पूर्वमेवं प्रेषिता मया वार्ता ।

अशोकः—किमिति ?

अमात्यः—

वृथाविरोधं परिहर्तुकामैः क्षान्ता तवाऽस्माभिरियं कुनीतिः ।
अद्यापि चेन्नानुसरेः स्वधर्मं भविष्यसि त्वं प्रभुदण्डपात्रम् ॥२१॥

अशोकः—साधु साधु । अस्मद्राजनीत्यनुसारी किल संदेशः । अथ किं तेन प्रत्युत्तरितम् ?

अमात्य —तेन सावज्ञमेवं प्रतिसन्दिष्टम् -

अहिंसाबोधनिष्णातैः शिरोमुण्डनपण्डितैः ।
अहो ! दण्डस्य नामाऽद्याप्येतैः संस्मर्यते चिरम् ॥२२॥

नेहरुः—(राधाकृष्णं प्रति) अहो ! सर्वदाप्येवंविधैव मनुष्यप्रकृतिः !

राधाकृष्णः—कः संदेहः—

पद्भ्यां गच्छतु धावताद्रथगणैर्वृक्षस्य मूलेऽथवा
प्रासादाग्रतले करोतु वसतिं भुङ्क्तां मृगान्वोदकम् ।
सर्वं पश्य वशीकरोत्ययमहो मोहाधिराजः सदा
कामाहङ्कृतिमुख्यनैकसचिवः का वास्ति काले भिदा ॥२३॥

अशोकः—(विहस्य) किमत्र चित्रं यदि मृदुता परिभवं क्रीणाति ? विशेषतश्च तादृशाद्यो हि पापभीतिराजभीत्यादिदूरः' । य —

'भीषास्मात्पवते वात' इत्यादिश्रुतिगीरपि ।
भयं हि बोधयत्येकं सेतुं लोकविधारणे ॥२४॥

राजगुरुः—(किञ्चिद्विहसति)

अशोकः—कुतो वा विहस्यते आचार्येण ?

राजगुरुः—न किमपि, महाराजेन तदा तदा अस्माभिरप्रमाणतया निराकृतानि वेदवचनान्युपक्षिप्यन्ते प्रमाणतयेति !

अशोकः—युक्तः संदेह आचार्याणाम् । परन्तु वेदसम्बद्धत्वमात्रेण कथं वा सत्यप्रतिपादकानां वचनानामप्रामाण्यमिति ज्ञातुमिच्छामि ।

राजगुरुः—श्वदृतिनिक्षिप्तगोक्षीरपवित्रतासदृशं वेदोक्तधर्मप्रामाण्यम् ?

अशोकः—(विहस्य) नैवं वक्तुमर्हति भवान् ।

दृश्यतां यत्र कुत्रापि सत्यं सत्यं हि सर्वदा ।
उपमादानमात्रेण साध्यते वस्तु नाऽन्यथा ॥२५॥

(सचिवमुद्दिश्य) अथ किं वा प्रतिसंदिष्टं भवता ?

अमात्यः—महाराजस्याशयं ज्ञातुमेवात्रागतोऽस्मि ।

अशोकः—किं वात्र कारणमुत्पश्यति भवानस्य कालिङ्गाविनयस्य ?

अमात्यः—प्रायः कालिङ्गः चिन्तयति 'अङ्गीकृतबौद्धधर्मः, अहिंसादिप्रचारनिरतश्च महाराजः न कदापि युद्धसन्नद्धो भविष्यती'ति । अपरा च स्यादस्योत्प्रेक्षा—अनेन च समयेनास्माकं सैन्येन नष्टवीर्येण भवितव्यमिति ।

अशोकः—सत्यमिदम् (किञ्चिद्विमृश्य) भवतु पूर्वमेव सन्दिष्टं खलु भवता 'भविष्यसि त्वं प्रभुदण्डपात्रम' इति । तदर्थञ्च क्रियतां यत्नः ।

अमात्यः—यदाज्ञापयति महाराजः ।

राजगुरुः—महाराज ! किञ्चिद्वात्र वक्तुकामोऽस्मि ।

अशोकः—आज्ञापयत्वाचार्यः ।

राजगुरुः—बौद्धधर्मानुसारिभिरस्माभिश्चिराद्विहितप्रचारां बौद्धधर्मसारभूतामहिंसामेकपद एव न परित्यक्तुमर्हति महाराजः।

अशोकः—(विचिन्त्य) आचार्य, सत्यमुक्तं भवता अहिंसा बौद्धधर्मसार भूतेति। अथवा, किमिदं बौद्धधर्मस्येति, सर्वधर्माणामपि किलैषा साधारणी यन्मनोवाक्कायैरहिंसा नाम। परन्तु कदाचिद् अहिंसाधर्मरक्षणाय हि सापि भवति साधनतया स्वीकर्तव्या। पश्यत्वाचार्यः—

यदि कलिङ्गनृपोऽद्य न हन्यते
स हि हिनस्ति जनानखिलांश्चिरम्।
चिरमनेकजनौघविनाशनात्
ननु वरं सकृदेकनिबर्हणम् ॥२६॥

राजगुरुः—परन्तु तथा चिरविहिताहिंसादिप्रचारो यदि भवानेव पृष्ठतः करोति तां महत्किलाऽपयशो भवतः ख्यापयेयुः शत्रवः। विचिन्त्यतां कथं वा मन्येरन् भवतो धर्मप्रियतामागामिनो जनाः।

अशोकः—(विहस्य) लोकक्षेमार्थमस्माभिः सकृदवलम्बितां हिंसां निन्देयुर्हिंसैकप्रकृतयः शत्रव इत्यल्पं मे विषादकारणम्। दोषैकपक्षपातिनो हि रिपवः किमद्य मां न दूषयन्ति निर्वीर्य इति? आगामिनो जना अन्यथा मन्येरन्निति कथं वा प्रकृतो राजधर्मः प्रजापालनं परित्यक्तुं शक्यते? अथवा कलिङ्गदेशयुद्धानन्तरमेव अशोकेनाहिंसादिप्रचारः कृत इति मंस्यन्ते आगामिनः। सर्वथापि न किमपि छिद्यतेऽस्माकम्। आचार्य! क्षन्तव्योऽयं शिष्यजनस्याविनयः।

राजगुरुः—(सबहुमानम्) कथमविनय इति? बहुस्ति किलाऽस्माभिरभ्यसनीयं भवतः।

अशोकः—अथवा, महामात्यः किं वा मन्त्रयते?

अमात्यः—महाराज! किमत्र मया वक्तव्यम्? न खल्वन्यथा भवितुमर्हति महाराजस्य वचनम्। यतः—

दोषो दृश्येत यः कोऽपि दोषान्वेषणतत्परैः।
बिभिमो यदि तेभ्योऽत्र श्वासोऽपि किल दुष्करः ॥२७॥

अशोकः—किमन्यदस्ति यत्किञ्चित्समालोचनीयम् ?

अमात्यः—न किमप्यत्याहितम् । परन्तु......

अशोकः—परन्तु ?

अमात्यः—केषुचित्किल प्रान्तेषु केचिद्राज्यभेदं, केचिद्वर्णवर्गादिभेदं, कतिचिच्च भाषादिभेदान्निमित्तीकृत्य प्रजास्वन्योन्यवैरमुत्पादयन्तस्तासामज्ञानमात्मलाभकारणं कुर्वन्ति ।

अशोकः—कथं नात्याहितं नाम ? आरम्भे ह्युपेक्षिता एतादृशा द्वेषाः कालान्तरे अशक्यशमना भवेयुः । को वात्र प्रथमस्य कारणम् ?

अमात्यः—अयमेव कलिङ्गराजः । स किल मतमपि निमित्तीकृत्य कांश्चिन्नृपानङ्गीकृतबौद्धधर्मम् , उत्तरदिशाभागस्थं भवन्तमभियोद्धुमुत्साहयति ।

अशोकः—भवतु, निश्चितमेव खलु तन्निर्मूलम् । (विचिन्त्य) अहो मूढता परप्रत्ययनेयबुद्धीनां जनानाम् ।

बुद्धधर्मो मतं बाह्यं राज्यधर्मश्च पालनम् ।
उभे ते मिश्रयन् लोको यतते स्वार्थलिप्सया ॥२८॥

नेहरुः—साधु, साधु ।

संजीवरेड्डिः—(विहस्य) मन्ये भवानेव बोधयतीति ।

अशोकः—अमात्य, सर्वत्राप्युद्घोष्यतामस्मद्राज्ये पुनः पुनः—

यत्किञ्चिद्वा मतं विन्दन्धर्मं यं कञ्चिदाचरन् ।
मान्योऽस्माकं स सर्वोऽपि यावदन्यान्न बाधते ॥२९॥

अमात्यः—यथाज्ञापयति महाराजः ।

राजगुरुः—योऽयं वर्णवर्गादिभेदः सर्वथा निराकृतोऽस्माकं बौद्धधर्मेण । तस्यापि च निर्मूलने प्रयतितव्यं भवता ।

अशोकः—सत्यमिदम्, परन्तु इदमशक्यकरणं यत्सर्वभेदसमुन्मूलनं नाम । अन्येऽपि किल भेदाः सर्वदा वर्तेरन्नेव धनी दरिद्र इति, मूढः बुद्धिमान् इति, स्वदेशीयो विदेशीय इति, स्वप्रान्तीयः परप्रान्तीय इति स्वग्रामीणः परग्रा-

मीणश्चेत्यादिः । अतः तेषां दण्डने यत्नः कर्तव्योऽस्माभिः—य एतादृशान्भेदान् अधिकान्कृत्वा तन्निमित्तेन च स्वलाभं प्राप्तुमभिलषन्ति । अतश्च एवमप्युद्-घुष्यताम्—

वर्णभेदं देशभेदं भाषाप्रान्तादिजां भिदाम् ।
स्वद्वेमायोपयुञ्ज्याद्यः स भवेत्तीव्रदण्डभाक् ॥३०॥

नेहरुः—साधु, साधु ।

राजगुरुः—भाषेत्यनेन स्मारितम् । कोऽयं भाषाकृतो विरोधः अमात्यवर्णितः ?

अमात्यः—अस्माभिः किल पालिप्रभृतयः प्रान्तविशेषप्रसिद्धा भाषा उपयुज्यन्ते राजकार्येषु शिलालेखादिषु च । तद्भाषाऽनभिज्ञाश्च केचित्प्रान्तान्त-रीया अस्माभि र्वतैव भाषा उपयोक्तव्या शिलालेखादिष्विति साग्रहं वदन्ति ।

अशोकः—कोऽत्र दोषः ? यस्मिन्प्रान्ते यस्या भाषायाः प्रचुरः प्रचारः सैव तत्रोपयुज्यताम् । यतः—

परस्परस्याशयवेदनार्थे लसन्ति भाषा विविधा हि लोके ।
यत्नोऽस्तु नः साध्यविशुद्धयेऽसौ कुतोमुधा साधनविप्रपत्तिः ॥३१॥

राजगुरुः—आसेतुहिमाचलं तीर्थयात्रादिसम्बन्धैर्मिलितानां भिन्नभिन्नप्रान्ती-यानां जनानामेकया भाषया भवितव्यम् । सा च संस्कृतवाण्येवेति मे मतिः ।

अशोकः—कोऽत्र सन्देहः ? अस्त्येव खलु सा सर्वदेशव्याप्ता सर्व-समृद्धा च ।

सा देवी कमलासनाननचरी यामादितो व्याहरत्
या नैकाब्दसहस्रसञ्चितमहाविज्ञानवारांनिधिः ।
माता या च समस्तभारतभुवां भाषाङ्गनानामसौ
वाणी कस्य नु न प्रियाऽपशुमतेः, सा सर्वथा वर्ध्यताम् ॥३२॥

अमात्यः—गृहीता आज्ञा । आदिशतु महराजः यदीतोऽन्यदपि यत्किञ्चित् कर्तव्यम् ।

अशोकः—किमन्यत् ? सर्वथा तथा प्रयतितव्यं यथा सर्वा अपि प्रजा

यथालाभसन्तुष्टा विना विद्वेषं शान्तचित्ताः प्रवर्तेरन्। तल्लाभश्च तदैव सिद्ध्येत् यदा पालकाः तदर्थं रात्रिन्दिवं महान्तं प्रयत्नं कुर्युः, बोधनादिना स्वयञ्चानुतिष्ठेयुः। यतो नैतादृशमिह विचित्रतरं वस्तु यथेयं मनुष्यप्रकृतिः।

पश्य—

नैवाऽद्वितीयोऽत्र नरः सुखी स्यात्
न वा विरोधेन च सद्वितीयः।
व्यर्थो विरोधोऽथ पुनश्च मैत्री
विचित्ररूपा प्रकृतिर्नराणाम् ॥३३॥

गम्यतां कार्यसिद्धये। वयमपि विजयवार्ताश्रवणोत्सुकाः प्रतीक्षिष्यामहे।

(अमात्यो गच्छति)

राजगुरुः—औत्सुक्यमात्रमेवेदम्, अवश्यंभावी किल भवतो विजयः।

अशोकः—(सगौरवम्) प्रभावोऽयं भवदाशिषाम्।

(भरतवाक्यम्)—

श्रेयःकामाश्च गुरवः कार्यदक्षाश्च मन्त्रिणः।
देशराज्यप्रिया भृत्याः किमन्यज्जयकारणम् ॥३४॥

(सर्वे निष्क्रान्ताः)

समाप्तो गर्भाङ्कः।

नेहरुः—अहो! नैकविषयचिन्ताव्याकुलमानसा वयं नवीकृता अभिनय—दर्शनेन।

राधाकृष्णः—किमत्राश्चर्यम्? विश्वश्रेयः किल विषयोऽस्य रूपकस्य।

[प्रविश्य अपटाक्षेपेण प्रतीक्षकः]

प्रतीक्षकः—विजयन्तां तत्रभवन्तः। कोङ्कणप्रान्तादद्यैव दूरभाषद्वारा समागतं वृत्तान्तं तत्रभवते प्रधानामात्याय निवेदयितुं सैनिककार्यदर्शी आगतो द्वारे प्रतीक्षते।

नेहरुः—शीघ्रं प्रवेश्यताम्।

प्रतीक्षकः—तथा (इति निष्क्रम्य तेन सह प्रविशति)

सैनिककार्यदर्शी—(सैनिकवन्दनं कृत्वा) प्रधानामात्य ! स्वायत्तीकृताः किल कोङ्कणा विनाऽऽयासेन ।

संजीवरेड्डिः —(सहर्षम्) किमियता अल्पकालेन ?

नेहरुः—(सवितर्कम्) कथ्यतां यथावृत्तम् ।

सैनिककार्यदर्शी—कोङ्कणाक्रमणाय किलादिष्टानि सैन्यानि शीघ्रमेव गन्तुं प्रवृत्तानि । ततश्च—

आदौ सैनिकवाहनानि च ततो नैके च पादातिकाः
आकाशेयनवाम्बुदभ्रमकरी गर्जद्विमानावलिः ।
नौका नैकवहाश्च शीघ्रमगमन्नावृत्य तान्कोङ्कणान्
त्यक्त्वा शस्त्रचयं बभूवुररयो वश्याः प्रहृष्टाः प्रजाः ॥३५॥

सर्वे—दिष्ट्या वर्धते भारतजननिरनेन विजयेन ।

नेहरुः—सेनाध्यक्षायास्माकमानन्दाभिनन्दने निवेद्य स्वं नियोगमशून्यं कुरु ।

सै० कार्यदर्शी—यथाज्ञापयति प्रधानामात्यः । (इति निष्क्रान्तः)

नेहरुः—(सविमर्शम्) हन्त ! अद्य किञ्चिन्निर्वृत्तो मेऽन्तरात्मा ।

यतः—

न सूचयत्येष जयः स्वशक्तिं
न वापि राज्यं नवमद्य लब्धम् ।
अथापि मे हृष्टतरोऽन्तरात्मा
सुसंहता भारतभूः समेति ॥३६॥

राधाकृष्णः—किं वाऽशक्यं भारतानां यदैते ऐक्यमत्येन प्रवर्तन्ते ।

यतः—

नैवाऽवीर्या न वाऽशौर्या न वा धीशक्तिवर्जिताः ।
हेतोः कुतश्चिन्निद्राणाः प्रबुध्यन्तेऽद्य भारताः ॥३७॥

नेहरुः—साधूक्तं भवता । इयञ्च सर्वदा मे मानसपरिवर्तिन्यभिलाषा—

(भरतवाक्यम्)

स्वदेशक्षेमार्थं सकलजनताऽसौ प्रयततां
पराश्चास्मत्सीमाक्रमणकुधियो यान्तु विजिताः ।
समृद्धोऽयं देशो विविधविभवैः सञ्चितबलो
विधत्तां सर्वत्राप्यनुपहतशान्तिञ्च भुवने ॥३८॥

राधाकृष्णः—तथाऽस्तु ।

(सर्वे निष्क्रान्ताः)

समाप्तमिदं रूपकम्

——

रूपकमिदमष्टग्रहकूटवत्सरे (फरवरी, १९६२) विरचितम् ॥

सुसंहतभारतम्

शुद्धिपत्रम्

पत्रे	पंक्तिः	अशुद्धम्	शुद्धम्
१	२१	अलङ्कतं	अलङ्कृतं
,,	२४	तस्याञ्चल	सस्याञ्चल
२	२०	घृत	धृत
३	४	भाषानानेकधा	भाषाननेकधा
३	२३	प्रघानामात्यः	प्रधानामात्यः
४	५	लसन्मणि	लसन्मणिः
५	१६	राज्यक्रियो	राज्यश्रियो
६	१३	भारतीयानामन्त	भारतीयानामत्र
२०	१२	मन्यते	मन्यन्ते
२०	१२	सर्वं	सर्वे
२३	१०	अग्रतो	जगदग्रतो
२३	१५	त्रिशद्वर्षाणि	त्रिशंद्वर्षाणि
२६	८	कियद्वासिष्यते	कियद्वावसिष्यते
३०	३१	विदेशीय	विदेशीया
३१	४	परिहास	परिहासा
३१	२७	वएनः	एव नः
३२	१४	दिवसपती	दिवस्पती
३२	२२	कश्मिंश्चि	कस्मिंश्चि
३४	११	किञ्चित्	यत्किञ्चित्
३४	२३	प्रषित	प्रेषित
४१	१३	विषयः	विशयः
४१	१७	,,	,,
४२	१०	रोऽस्थर	रोऽस्थिर
४४	११	द्यैकैव	द्यैकैक

पत्रे	पंक्तिः	अशुद्धम्	शुद्धम्
४४	१६	रेव	रेवं
४६	४	युवाभ्यामेव	युवामेव
४७	७	स्वागत	स्वागतं
४८	२४	हृदये	हृदयेन
४८	२५	वयो	वयोः
४९	६	प्रेरितम्	प्रेषितम्
५०	३	तथा	यथा
५१	९	यां दृष्ट्वा	यं दृष्ट्वा
५४	१६	निपुणः	निपुणाः
५५	२५	भैषी	भैषीः
५६	५	अत्रान्त	अत्रान्तरे
,,	१८	ग्रहीतः	गृहीतः
,,	२२	लेख	लेखः
५७	७	नानुगच्छति	नानुगतो गच्छति
,,	२६	एतावुत्पीडिता	एतावत्पीडिता
५८	७	स्यास्य	स्याद्य
५८	७	लाभे तदैक	लाभेऽस्मिन्नैक
५९	६	स्थः	स्थ
५९	१७	यत्र तत्र	यत्र यत्र
,,	२२	व्यथित	व्ययित
,,	२४	चानिश	चानिशं
६०	९	आस्तां याव	आस्तां ताव
६१	७	राष्ट्रप्रमुखाः	राष्ट्रप मुखाः
,,	१८	भवदीया	भवदीय
६२	५	प्रथम	प्रथमं
,,	१३	नागरिक	नागरिकं
,,	१९	सङ्कचित	सङ्कुचित
६४	९	दृश्य	दृश्यं
६४	१६	ग्रन्थको	ग्रथको
६६	१३	सम्बद्धया	सम्बद्धेन

पत्रे	पंक्तिः	अशुद्धम्	शुद्धम्
६७	८	चीनाप्तार	चीनापार
,,	२५	न्वोदकं	न्वोदनं
६८	,,	किञ्चिद्वात्र	किञ्चिदिवात्र
६६	२७	विभिमो	बिभिमो
७०	१५	बुद्ध	बुद्धि
७२	६	आकाशेय	आकाशे च
७३	१६	निर्वृंत्तो	निर्वृतो